B.A. Sanskrit
Year – II
Semester – III
Paper - V

# रघुवंशः त्रयोदशः सर्गः
# Raghuvamsa – Canto 13

## Centre for Distance and Online Education


श्रीचन्द्रशेखरेन्द्रसरस्वतीविश्वमहाविद्यालयः

**Sri Chandrasekharendra Saraswathi Viswa Mahavidyalaya**

Deemed to be University u/s 3 of UGC Act 1956 - Accredited with 'A' grade by NAAC

**Enathur, Kanchipuram 631561.**

Sponsored and run by Sri Kanchi Kamakoti Peetam Charitable Trust

**Chief Editor**
Prof. Dr. G. Srinivasu
Vice-Chancellor, SCSVMV

**General Editor**
Dr. B. Balaji Srinivasan
Director, CDOE

**Programme Co-ordinator**
Dr. Debajyoti Jena

**Additional Co-ordinator**
1. Dr. R. Naveen (Academic)
2. Dr. M. Senthil Kumaran (Technical)

**Course Co-ordinator**
Dr. R. Naveen

**Course Writer**
Dr. T.K. Narasimhan
Dr. Shubh Chandra Jha
Dr. Mayank Pandey

**Assistants**
S. Vasudevan
S.V. Kalpavalli

**© SCSVMV Deemed University, June 2024**
**All rights reserved. No part of this work may be reproduced in any form, by mimeograph any other means, without permission in writing from the below mentioned centre**
**Further information on the SCSVMV ODL Programmes may be obtained from Centre for Distance and Online Education (CDOE)**

**Sri Chandrasekharendra Saraswathi Viswa Mahavidyalaya,**
**Enathur,Kanchipuram-631561.**
**Tamil Nadu, India**
**Phone: 044 – 2726 4301; Mail Id: onlineprograms@kanchiuniv.ac.in ;**

# शुभाभिनन्दनानि

संस्कृतवाङ्मयाध्ययननिरतानां समेषां विद्यार्थिनां श्रीचन्द्रशेखरेन्द्रसरस्वती विश्वमहाविद्यालयेन काञ्चीपुरस्थेन सञ्चाल्यमाने दूरविद्याकेन्द्रे भागं ग्रहीतुं सादरं स्वागतम्। विश्वविद्यालयोऽयं राष्ट्रियमूल्याङ्कनप्रत्यायनपरिषदा (NAAC) 'A' श्रेण्यां प्रमाणीकृतः एवं विश्वविद्यालयानुदानायोगेन (UGC) सङ्घटनेन दूरविद्याकेन्द्रत्वेन अनुमतः वर्तते।

विश्वमहाविद्यालयोऽयं १९९३ वर्षे भारतसर्वकारद्वारा प्रकटितः तदारभ्य प्रतिवर्षं विद्याध्यापनक्षेत्रे तथा परिशोधनकार्ये च महतीं समुन्नतिं प्रदर्शयन् वर्धमानः अस्ति। भारतीयपरम्परायां प्राचीनानां ऋषीणां पण्डितानां तथा कवीनां च योगदानं मानवस्य सर्वाङ्गीनविकासाय तथा लोकपरिरक्षणाय च ज्ञानगङ्गां निरन्तरतया प्रवाहयति। नैकानि शास्त्राणि तत्र वर्तन्ते। वेदाः चत्वारः, उपवेदाः, उपनिषदः, षडङ्गाणि, षड्दर्शनानि, अष्टादशपुराणानि, इतिहासौ, धर्मशास्त्रं, काव्यानि, चतुःषष्टिकलाः इत्यादिना ज्ञानपरम्परा अनन्ता सति बहुभ्यः युगेभ्यः लोकस्य मार्गदर्शनं करोति।

प्रकृतेऽस्मिन् काले पाश्चात्यविज्ञानस्य प्रभावेन भारतीय ज्ञानदीपस्य प्रकाशः ह्रासतामेति। आधुनिकविज्ञानद्वारा समाजस्य लाभः विद्यते एव। तथापि अस्मदीयं वाङ्मयं तु न विस्मरणीयं परित्याज्यं च। भारतीयानाम् अनुभवे आचरणे च विद्यामाना योगविद्या प्रपञ्चे सर्वैरपि आद्रियमाना दृश्यते। एवम् आयुर्वेदादयः अपि। अतः अधुनातनविज्ञानेन साकं प्राचीनविज्ञानस्य संयोजनद्वारा प्रपञ्चस्य महानुपयोगः भवति। अनयैव धिया श्रीकाञ्ची कामकोटिपीठाधिपैः प्राचीन-नवीन विद्ययोः संमेलनाय विश्वमहाविद्यालयोऽयं संस्थापितः। तदिदं लक्ष्यम् अग्रे सारयति अध्यापनेन परिशोधनेन च।

श्रीचन्द्रशेखरेन्द्रसरस्वती विश्वमहाविद्यालयः स्वीयेप्राङ्गने बहुविधाः विद्याः बोधयन् दूरस्थानां जिज्ञासूनामपि लाभाय केन्द्रमिदं प्रचालयति। एतत् द्वारा विद्यार्थिनः लाभं लभन्तामिति आशास्महे।

Vice chancellor

Sri Chandrasekharendra Saraswati Viswa Mahavidyalaya

Enathur, Kanchipuram

# रघुवंशम् १३ सर्गः

## पाठ्यपरिचयः

**"पुरा कवीनां गणनाप्रसङ्गे अनामिकाधिष्ठित कालिदासः ।**

**अद्यापि तत्तुल्यकवेरभावादनामिका सार्थवती बभूव ।।"**

इत्यादिभिः बहुभिः प्रकीर्तितः महाकविः कालिदासः कविकुलगुरुः कविचक्रवर्ति-इत्यादिनाम्ना सुप्रसिद्धः। तेन त्रीणि महाकाव्यानि रचितानि- रघुवंशम्, कुमारसम्भवम्,मेघदूतम् चेति। तत्र आदिमे द्वे काव्ये महाकाव्येषु अन्तर्भवतः। रघुवंशमहाकाव्यं तावत् सूर्यवंशस्य प्रभाववर्णनात्मकं काव्यं भवति। तत्र एकोनविंशतिसर्गाः सन्ति। आदितः ९ सर्गपर्यन्तं दिलीपमारभ्य दशरथपर्यन्तराज्ञां वर्णनं कृतम्। १० सर्गात् १५ सर्गपर्यन्तं भगवतः श्रीरामस्य वर्णनं भवति। त्रयोदशसर्गे कविवरेण कालिदासेन भारतभूमेः दक्षिणभागस्य मनोहराः प्रान्ताः, आकाशचुम्बिनः पर्वताः ऋषिजनचरणकमलरजोभिः पवित्रीकृतानि तपोवनानि, अनेकानि च अन्यानि निसर्ग-मधुराणि वस्तूनि कथाच्छलेन वर्णितानि । पुष्पकविमानवर्तिन्याः सतीकुल-चूडामणेः भगवत्याः सीतायाः यात्राश्रमापनोदाय तस्याः मनोविनोदाय च श्रीरामचन्द्रः मार्गवर्तिनः मधुरान् पदार्थान् प्रदर्शयामास' इति कथामिषेण महाकविना कालिदासेन दक्षिणभारतस्य कवितामयम् अलौकिकं मानचित्रम् प्रकल्पितम् । अस्य पाठस्य अध्ययनेन छात्राणां काव्येषु उन्नतगतिः भवति तथा संस्कृतभाषायामपि दार्ढ्यं भवति इति निश्चप्रचम्।

## प्रथमखण्डपरिचयः

अस्मिन् प्रथमखण्डे १-१८ श्लोकाः सन्ति। सीतारामयोः पुष्पकविमानारोहणं आदौ पर्तिपादितम। ततः परं रामः सुमद्रस्य वर्णनं करोति सीतायै। ततः क्रमेण समुद्रतटस्य वर्णनं, तथा समुद्रे विद्यमानानां मत्स्यानां वर्णनं तथा अन्यजन्तूनां च वर्णनं कृतं भवति। उपमया अन्ये अंशाः अपि सरलया प्रतिपादिताः। अस्य खण्डस्य अध्ययनेन छात्राणां समुद्रस्य तथा पुष्पकविमानस्य, रामसेतोश्च ज्ञानं

भवति। संस्कृतभाषोपयोगाय नूतनाः शब्दाः अत्र प्रयुक्ताः तेन भाषाज्ञानं वर्धते। न्यायशास्त्रस्यापि मध्ये प्रदर्शनेन तच्छास्त्राध्ययने रुचिः भवति।

## द्वितीयखण्डपरिचयः

अस्मिन् द्वितीयखण्डे १९-३६ श्लोकाः सन्ति। अत्र मेघस्य वर्णनम्,आकाशस्य वर्णनम्,गङ्गायाः वर्णनम्, सीतायाः कृते आभरणमभूत् मेघः इति उत्प्रेक्षणम्, जनस्थानवर्णनम्, नूपुरपतनस्य वर्णनम्, ततः परं कतिपयश्लोकैः रामस्य सीतायाः अपनयानन्तरं यद्दुःखमनुभूतं तस्य वर्णनम्, ततः परं माल्यवत्पर्वतस्य वर्णनम्, त्रिभिः श्लोकैः तच्छिखरस्य वर्णनम्, त्रिभिः श्लोकैः पम्पानद्याः वर्णनम्, आकाशे गच्छतां सारसानां उपमया वर्णनम्, पञ्चवट्याः वर्णनम्, अगस्तयाश्रमवर्णनम्। एतेषामध्ययनेन छात्राणां विभिन्नदेशानां परिचयो भवति।

## तृतीयखण्डपरिचयः

अस्मिन् तृतीयखण्डे ३७-५३ श्लोकाः सन्ति। अत्र आदौ आरब्धस्य अगस्त्याश्रमस्यैव पुनः प्रस्तुतिः भवति। तत्रापि हविषः गन्धः तस्मिन्नाश्रमे सम्पूर्णतया व्याप्य तिष्ठति इति वर्णनं कृतम्। आकाशवायुः सीतायाः स्वेदलवान् आचामति इति वर्णयति रामः। ततः शातकर्णेः आश्रमस्य वर्णनम्, ततः शातकर्णेः चरित्रवर्णनम्, सुतीक्ष्णमहर्षेः वर्णनम्,पूर्वं दृष्टस्य शरभङ्गमहर्षेः माहात्म्यवर्णनम्, ततः मनदाकिनिनद्याः वर्णनम्, मत्रिमहरषेः तपोवनस्य वर्णनम्। अनेन खण्डेन छात्राणां अगस्त्यादिमहर्षीणां तथा सप्तर्षीणां च विषये ज्ञानं भवति।

## चतुर्थखण्डपरिचयः

अस्मिन् चतुर्थखण्डे ५४-६५ श्लोकाःसन्ति। अत्र च चतुर्भिः श्लोकैः गंगायमुनयोः संगमस्य वर्णनं भवति। ततः तत्संगमस्थाने स्नानं मोक्षं प्रयच्छति इति वर्णनम्, ततः श्रृङ्गिबेरपुरं दृष्ट्वा तत्र विद्यमानस्य गुहस्य तथा पूर्वजातकथायाः स्मारणमपि रामेण कृतम्। ततः परं चतुर्भिः श्लोकैः सरयूनद्याः वर्णनं

भवति। रामः अयोध्यां प्रति समागतः इति सूचनाय हनूमतः प्रेषणम् तदनन्तरं ससैन्यस्य भरतस्य आगमनं च प्रतिपादितं भवति। अनेन खण्डेन छात्राणां सरयूनद्याः वैशिष्ट्यं ज्ञायते। तथा भरतस्य भ्रातृवात्सल्यमपि ज्ञायते।

## पञ्चमखण्डपरिचयः

अस्मिन् पञ्चमखण्डे ६६-७९ श्लोकाः सन्ति। अत्र च भरतोऽपि चीरवासाः सन् वसिष्ठादीन् पुरस्कृत्य राममभ्युपैति इति सूचनम्,ततः असिधाराव्रत् भरतेन राज्यं कृतमिति वर्णनम्, ततः परं पुष्पकविमानस्य आकाशादवतरणम्, विमानात् सीतारामयोः अवतरणम्, ततः रामस्य ज्येष्ठानां वन्दनम्, कुशलपश्नादीनां वर्णनम्, भरतेन सह रामस्य आलिङ्गनम्, अर्धक्रोशदूरं यावत् पद्भ्यां रामेण गमनमिति इमे अंशाः प्रतिपादिताः भवन्ति।अनेन खण्डेन छात्राणां रामस्य विनम्रता तथा बन्धुजनपरिपालनादिकं ज्ञायते।

| खण्डः | विषयः | पुटसङ्ख्या |
|---|---|---|
| प्रथमखण्डः | १-१८ श्लोकाः | 8-22 |
| द्वितीयखण्डः | १९-३६ श्लोकाः | 23-39 |
| तृतीयखण्डः | ३७-५३ श्लोकाः | 40-53 |
| चतुर्थखण्डः | ५४-६५ श्लोकाः | 54-63 |
| पञ्चमखण्डः | ६६-७९ श्लोकाः | 64-77 |

# खण्डः १

## पाठरचना

- प्रस्तावना
- उद्देश्यम्
- मूलम्
    1. अन्वयः
    2. तात्पर्यम्
- सारांशः
- बोधप्रश्नाः
- शब्दावली
- सन्दर्भग्रन्थः
- सहायकग्रन्थः
- बोधप्रश्नोत्तराणि
- अभ्यासप्रश्नाः

## प्रस्तावना

महाकविः कालिदासः कविकुलगुरुः कविचक्रवर्ति-इत्यादिनाम्ना सुप्रसिद्धः। तेन त्रीणि महाकाव्यानि रचितानि- रघुवंशम्, कुमारसम्भवम्,मेघदूतम् चेति। तत्र आदिमे द्वे काव्ये महाकाव्येषु अन्तर्भवतः। रघुवंशमहाकाव्यं तावत् सूर्यवंशस्य प्रभाववर्णनात्मकं काव्यं भवति। तत्र एकोनविंशतिसर्गाः सन्ति। आदितः ९ सर्गपर्यन्तं दिलीपमारभ्य दशरथपर्यन्तराज्ञां वर्णनं कृतम्। १० सर्गात् १५ सर्गपर्यन्तं भगवतः श्रीरामस्य वर्णनं भवति। तन्मध्ये विद्यमानस्य अस्य त्रयोदशसर्गस्य विषयः भवति लङ्कापुरीतः पुष्पकविमानेन अयोध्यां प्रति पुनः गमनम्। अस्मिन् खण्डे आदितः १८

श्लोकाः सन्ति। अत्र पुष्पकविमानारोहणं आदौ पर्तिपादितम। ततः परं रामः सुमद्रस्य वर्णनं करोति सीतायै। ततः क्रमेण समुद्रतटस्य वर्णनं ततः समुद्रे विद्यमानानां मत्स्यानां वर्णनं तथा अन्यजन्तूनां च वर्णनं कृतं भवति।

## उद्देश्यम्

- रामस्य पुष्पकविमानयात्रा सरलया रीत्या ज्ञायते
- कालिदासस्य काव्यसौष्ठवमवगच्छति
- विभिन्नालङ्काराणां परिचयो भवति
- शब्दानां धातूनां च प्रयोगोपयोगिता ज्ञायते
- समुद्रस्य वर्णनं ज्ञातुं शक्नुमः

**अथात्मनः शब्दगुणं गुणज्ञः पदं विमानेन विगाहमानः ।**

**रत्नाकरं वीक्ष्य मिथः स जायां रामाभिधानो हरिरित्युवाच ॥ १ ॥**

**अन्वयः** –

अथ गुणज्ञः सः रामाभिधानो हरिः आत्मनः शब्दगुणं पदं विमानेन विगाहमानः रत्नाकरं वीक्ष्य मिथः जायामित्युवाच ॥ १ ॥

## तात्पर्यम्-

रावणवधोऽपरान्ते लङ्कायाः निवर्त्य सीतासमेतः विष्णोरवतारः भगवान् रामचन्द्रः पुष्पकविमानारूढः सन् अयोध्यां प्रति आकाशमार्गेण गच्छन् अधोवर्तमानं विशालसमुद्रं दृष्ट्वा प्रियतमायाः सीतायाः यात्राऽश्रमशमनाय तस्याः मनोविनोदाय च रहसि इति(वक्ष्यमाणक्रमेण) उवाच ॥ १ ॥

**वैदेहि पश्याऽमलयाद्विभक्तं मत्सेतुना फेनिलमम्बुराशिम् ।**

**छायापथेनेव शरत्प्रसन्नमाकाशमाविष्कृतचारुतारम् ॥ २॥**

**अन्वयः –**

(हे) वैदेहि ! आ मलयात् मत्सेतुना विभक्तं फेनिलम् अंबुराशिं छायापथेन (विभक्तं) शरत्प्रसन्नम् आविष्कृतचातारम् आकाशमिव पश्य ॥ २ ॥

**तात्पर्यम् –**

अयि विदेहराजतनये ! तव रावणपाशादुद्धाराय मन्निर्मितेन सेतुना मलयाचलपर्य्यन्तं द्विधाकृतं इदं फेनवन्तं समुद्रं अवलोकय । गंगापथेन विभागीकृतं शरन्निर्मलं मेघविनिर्मुक्तं प्रस्फुटमञ्जुलनक्षत्रम् नीलनभोमण्डलमिव शाभते अयं विशालसागरः ॥२ ॥

**गुरोर्यियक्षोः कपिलेन मेध्ये रसातलं संक्रमिते तुरंगे ।**

**तदर्थमुर्वीमवदारयद्भिः पूर्वैः किलायं परिवर्धितो नः ॥ ३॥**

**अन्वयः-**

यियक्षोः गुरोः मेध्ये तुरंगे कपिलेन रसातलं संक्रमिते (सति) तदर्थम् उर्दीम् अवदारयद्भिः नः पूर्वैरयं परिवर्धितः किल ॥ ३ ॥

**तात्पर्यम् –**

अयि प्रिये! यज्ञं कर्तुमिच्छोः पितुः सगरस्य पवित्रे अश्वे कपिलद्वारा रसातले नीते सति तस्य अन्वेषणाय भूमिं खनद्भिः अस्माकं पूर्वपुरुषैः सगरसुतैः एष समुद्रः विवर्धितः इति ऐतहासिकी कथा।

अनेन कारणेनैव एष समुद्रः सागरनाम्ना विश्रुतः जगति । अत एव अस्माकं पूज्यः पूर्वपुरुषाणां अक्षयः कीर्तिस्तम्भोऽपि च अयं विशालसागरः वर्तते ॥३

**गर्भं दधत्यर्कमरीचयोऽस्माद्विवृद्धिमत्राश्नुवते वसूनि ।**

**अबिन्धनं वह्निमसौ बिभर्ति प्रह्लादनं ज्योतिरजन्यनेन ॥ ४॥**

**अन्वयः** –

अर्कमरीचयः अस्माद्गर्भं दधति अत्र वसूनि विवृद्धिम् अश्नुवतेऽसौ अबिन्धनं वह्निं बिभर्ति अनेन प्रह्लादनं ज्योतिरजनि ॥ ४ ॥

**तात्पर्यम्** –

सूर्यकिरणाः अस्मात् जलमपकर्षयन्ति परिवर्तयन्ति च तज्जलं मेघस्वरूपे, ततः तदेव जलं वृष्टिवारिरूपेण वसुन्धरां शस्यश्यामलां धनधान्यवतीञ्च करोति । अस्मिन्समुद्रे रत्नानि वर्धन्ते । अनेनैव समुद्रस्य रत्नाकरत्वमुक्तम् । असौ उदकैधसम् सहजरिपुं बडवानलं पुष्णाति । अस्मात् रत्नाकरात् संजातः सर्वानन्दप्रदः चन्द्रः ॥ ४ ॥

**तां तामवस्थां प्रतिपद्यमानं स्थितं दश व्याप्य दिशो महिम्ना ।**

**विष्णोरिवास्यानवधारणीयमीदृक्तया रूपमियत्तया वा ॥ ५॥**

**अन्वयः** –

तांतामवस्थां प्रतिपद्यमानं महिम्ना दश दिशो व्याप्य स्थितं विष्णोरिवास्य रूपम् ईदृक्तया इयत्तया वा अनवधारणीयम् ॥५ ॥

**तात्पर्यम्** -

यथा भगवान् विष्णुः अनेकाम् सत्वाद्यवस्थाम् मत्स्यकूर्माद्यवस्थाम् वा प्राप्नोति, तथा एष रत्नाकरोऽपि अनेकाम् अवस्थां भजते । स कदाचिदुल्लसति, कदा- चिद्विक्षुभ्यति, कदाचिन्मथ्यते, कदाचित् शुष्यति च । विष्णुर्यथा दिव्यतेजसा दशदिशो व्याप्य तिष्ठति, समुद्रोऽपि तथा स्वमहिम्ना दशसु दिशासु विस्तारं प्राप्य संतिष्ठते । अतः विष्णोः सादृश्यम् समुद्रस्य, तस्मात् विष्णोरिव तस्य रूपमपि प्रकारतः परिमाणतश्च दुर्निरूपमस्ति ॥५ ॥

**नाभिप्ररूढाम्बुरुहासनेन संस्तूयमानः प्रथमेन धात्रा ।**
**अमुं युगान्तोचितयोगनिद्रः संहृत्य लोकान्पुरुषोऽधिशेते ॥ ६॥**

**अन्वयः**-

युगांतोचितयोगनिद्रः पुरुषः लोकान्संहृत्य नाभिप्ररूढाम्बुरुहासनेन प्रथमेन धात्रा संस्तूयमानः (सन) अमुम् अधिशेते ॥ ६ ॥

**तात्पर्यम्**-

प्रलयोपरान्ते गृहीतयोगनिद्रः नाभिसंजातसरोजाश्रयेण पितामहेन प्रशस्यमानः परमपुरुषः चर्तुदशभुवनानि आत्मनि विलीय अस्मिन्नेव समुद्रे शयनं कराति । प्रलयसंजातेऽपि एतस्य रत्नाकरस्य विनाशः न भवति अन्तर्हितेषु सकललोकेषु अनादिपुरुषः जगदीश्वरः अत्रैव शेते ॥ ६ ॥

**पक्षच्छिदा गोत्रभिदात्तगन्धाः शरण्यमेनं शतशो महीध्राः ।**

**नृपा इवोपप्लविनः परेभ्यो धर्मोत्तरं मध्यममाश्रयन्ते ॥ ७॥**

**अन्वयः** –

पक्षच्छिदा गोत्रभिदा आत्तगंधा महीध्राः शतशः शरण्यम् एनं परेभ्यः उपप्लविनो नृपाः धर्मोत्तरं मध्यममिवाश्रयन्ते ॥ ७ ॥

**तात्पर्यम्** -

सुरेन्द्रः एकदा क्रुद्धीभूय पर्वतानाम् पक्षान् अच्छिनत् । तदा ते तस्माद्भयभीतो भूत्वा अतुलबल-शालिनः पुण्यश्लोकस्य शरणागतवत्सलस्य समुद्रस्य शरणमागताः । तदा एष समुद्रः सुरेन्द्रात् ईषदपि भयं न कृत्वा स्वकृत्यं देवराजस्य प्रचण्डामर्षकारणमपि मन्यमानश्च तेभ्यः पर्वतेभ्यः तथैव अभयं प्रदापयामास यथा कोऽपि मध्यस्थः न्यायपरायणः नृपः शत्रुभिः परिपीडितेभ्यः नृपेभ्यः कामपि परिणामचिन्तां न कृत्वा शरणं ददाति ॥ ७ ॥

**रसातलादादिभवेन पुंसा भुवः प्रयुक्तोद्वहनक्रियायाः ।**

**अस्याच्छमम्भः प्रलयप्रवृद्धं मुहूर्तवक्त्राभरणं बभूव ॥ ८॥**

**अन्वयः**-

आदिभवेन पुंसा रसातलात् प्रयुक्तोद्वहनक्रियायाः भुवः प्रलयप्रवृद्धम् अस्य स्वच्छमम्भः मुहूर्तवक्त्राभरणं बभूव ॥ ८ ॥

**तात्पर्यम्**–

यदा प्रलयोपरान्ते आदिवराहः रसातलमग्नां देवीं वसुमतीम् स्वदन्ताग्रे धृत्वा तामुपरि आनिनाय तत्काले अस्य रत्नाकरस्य प्रलयोद्वेलितम् स्वच्छं जलं तस्याः वसुधायाः मुखावगुण्ठनमिव क्षणं आभाति स्म । तस्मिन्काले देवी वसुन्धरा नवपरिणीता अवगुण्ठनवती सलज्जा वधूरिव शुशुभे ॥ ८ ॥

**मुखार्पणेषु प्रकृतिप्रगल्भाः स्वयं तरंगाधरदानदक्षः ।**

**अनन्यसामान्यकलत्रवृत्तिः पिबत्यसौ पाययते च सिन्धूः ॥ ९॥**

**अन्वयः** –

अनन्यसाधारणरूपेण पत्न्याः निकटे सुखानुभवशाली तरंगरूप-अधरदाने दक्षः मुखार्पणेषु स्वभावतः एव प्रगल्भः असौ समुद्रः नदीः स्वयं पिबति पाययते च ॥ ९ ॥

**तात्पर्यम्**-

सामान्यपुरुषः एकस्मिन् काले एकस्याम् रमण्यामेव रमते परन्तु एष समुद्रः युगपदेव अनेकाभिः नदीनारीभिः सह विलसति । अत एव अस्य रत्नाकरस्य रमणीभोगव्यापारः सामान्यपुरुषेभ्यः विलक्षणः असाधारणश्चास्ति । अयं समुद्रः चुम्बनव्यापारेऽपि अतीवकुशलोऽस्ति । सः अनेकनदीतरङ्गाधररसं समकालमेव पानं करोति आस्वादयति च ताभ्यः स्वकल्लोलाधररसम्। ॥ ९ ॥

**ससत्वमादाय नदीमुखाम्भः संमीलयन्तो विवृताननत्वात् ।**

**अमी तिरोभिस्तिमयः सरन्ध्रैरूर्ध्वं वितन्वन्ति जलप्रवाहान् ॥ १०॥**

**अन्वयः** –

अमी तिमयः विवृताननत्वात् ससत्वं नदीमुखाम्भः आदाय सम्मीलयन्तः (संतः) सरन्ध्रैः शिरोभिः जलप्रवाहान् ऊर्ध्वं वितन्वन्ति ॥ १० ॥

**तात्पर्यम्**–

अयि प्रिये! पश्य ! तिमिजातयोः मत्स्याः स्वमुखानि व्यादाय जन्तुसहितं जलं गृह्णन्ति, निरोधयन्ति च पश्चात् आननानि । ततः शिरोविवरैः वारिनिर्धारान् प्रक्षिपन्ति । जलं बहिर्निःसारयन्ति भक्षयन्ति च अवशिष्टान् जन्तून् ॥ १० ॥

**मातंगनक्रैः सहसोत्पतद्भिर्भिन्नान्द्विधा पश्य समुद्रफेनान् ।**

**कपोलसंसर्पितया य एषां व्रजन्ति कर्णक्षणचामरत्वम् ॥ ११ ॥**

**अन्वयः** -

सहसोत्पतद्भिर्मातंगनक्रैः द्विधा भिन्नान्समुद्रफेनान् पश्य, ये एषां कपोलसंसर्पितया कर्णक्षणचामरत्वं व्रजन्ति ॥ ११ ॥

**तात्पर्यम्** -

अयि सीते ! पश्य ! यदा अमी गजाकाराः नक्राः जलगर्भात् अकस्मादूर्ध्वम् समुच्छलन्ति तदा समुद्रफेनाः द्विधा विभक्ताः भवन्ति । तस्मिन्काले नक्राणां कपोलसंघट्टनेन ते फेनाः वालव्यजनत्वं भजन्ते अर्थात् तेषां शोभा गजकर्णयोः चामरशोभा इव भवति ।॥ ११ ॥

**वेलानिलाय प्रसृता भुजंगा महोर्मिविस्फूर्जथुनिर्विशेषाः ।**

**सूर्यांशुसंपर्कविवृद्धरागैर्व्यज्यन्त एते मणिभिः फणस्थैः ॥ १२ ॥**

**अन्वयः-**

वेलानिलाय प्रसृताः महोर्मिविस्फूर्जथुनिर्विशेषाः एते भुजंगाः सूर्यांशुसंपर्कसमृद्धरागैः फणस्थैः मणिभिः व्यज्यन्ते ॥ १२ ॥

**तात्पर्यम्** -

वायुभक्षणाय तीरभूमौ लम्बायमानाः एते भुजङ्गाः विशालसमुद्रतरङ्गेभ्यः अभिन्नाः प्रतीयन्ते । केवलं सूर्यकिरणस्पर्शप्रवृद्धकान्तिभिः फणास्थितैः मणिभिः ते समुद्रतरङ्गेतरस्वरूपाः ज्ञायन्ते। यदि तेषां मूर्धसु अर्कमरीचिसंसर्गसमृद्धतेजसः मणयः न स्युः तर्हि विशालसमुद्रतरङ्गेभ्यः कश्चन भेदः न प्रतीयेत् ॥ १२ ॥

**तवाधरस्पर्धिषु विद्रुमेषु पर्यस्तमेतत्सहसोर्मिवेगात् ।**

**ऊर्ध्वाङ्कुरप्रोतमुखं कथंचित्क्लेशादपक्रामति शङ्खयूथम् ॥ १३॥**

**अन्वयः** –

तवाधरस्पर्धिषु विद्रुमेषु सहसोर्मिवेगात्पर्यस्तमूर्ध्वांकुरप्रोतमुखम् एतत शंखयूथं कथंचित्क्लेशादपक्रामति ॥ १३॥

**तात्पर्यम्**–

अयि विदेहराजतनये ! एतत् अन्यदृश्यं पश्य तावत् । हठात् कल्लोलवेगेन तवाधरसादृश्यं गतेषु प्रवालेषु प्रक्षिप्तः शङ्खसमूहः तेषां प्ररोहेषु स्यूतमुखः सन् महता कष्टेन आत्मानं मोचियित्वा शनैः शनैः पश्चादपसर्पति ॥ १३॥

**प्रवृत्तमात्रेण पयांसि पातुमावर्तवेगाद्भ्रमता घनेन ।**

**आभाति भूयिष्ठमयं समुद्रः प्रमथ्यमानो गिरिणेव भूयः ॥ १४॥**

**अन्वयः**-

पयांसि पातुं प्रवृत्तमात्रेण आवर्त्तवेगात् भ्रमता घनेनायं समुद्रः भूयोऽपि गिरिणा प्रमथ्यमान इव भूयिष्ठमाभाति ॥ १४ ॥

**तात्पर्यम्**–

अयि प्राणप्रिये ! अवलोकय तावत् अन्यदृश्यमपि । एष मेघः जलपानायात्रागच्छत् परन्तु वारिमात्रमेव स्पृशन् स जलं पातुं समर्थोनाभवत् । प्राचीनकाले मन्दराचलेन मथ्यमानस्य समुद्रस्य दृश्यमत्र अभिनीतमिव सम्प्रति प्रतीयते ॥१४॥

**दूरादयश्चक्रनिभस्य तन्वी तमालतालीवनराजिनीला ।**

**आभाति वेला लवणाम्बुराशेर्धारानिबद्धेव कलङ्करेखा ॥१५॥**

**अन्वयः**-

अयश्चक्रनिभस्य लवणाम्बुराशेः दूरात्तन्वी तमालतालीवनराजिनीला वेला धारानिबद्धा कलंकरेखेवाभाति ॥ १५ ॥

**तात्पर्यम्**–

अयि! अधुना वयं तीरभूमौ समागताः । पश्य, अयं समुद्रः एकं बृहदाकारं लोहचक्रमिव प्रतीयते। अस्य च तटभूमिः तमालतालवनश्रेणिभिः कृष्णवर्णा दूरात् अतिकृशा च दृश्यते। अत एव एषा तटभूमिः चक्राश्रिता मालिन्यरेखा इव आभाति ॥१५॥

**वेलानिलः केतकरेणुभिस्ते संभावयत्याननमायताक्षि ।**

**मामक्षमं मण्डनकालहानेर्वेत्तीव बिम्बाधरबद्धतृष्णम् ॥ १६॥**

**अन्वयः** –

हे आयताक्षि! वेलानिलः केतकरेणुभिः ते आननं संभावयति बिम्बाधरबद्धतृष्णं मां मण्डनकालहानेः अक्षमं वेत्तीव (अयम्) ॥ १६ ॥

**तात्पर्यम्**-

अयि! विशालकमललोचने ! अहम् तव प्रवालपल्लवाधररसपानेन स्वप्रणयतृष्णां शमनाय अतीवोत्सुकः अस्मि अत एव तव मुखमण्डलमण्डने यः कालक्षेपः भविष्यति तं सोढुम् अहम् असमर्थः। तीरसमीरः मम इत्थं अभिप्रायं ज्ञात्वा केतककुसुममकरन्देन तवाननश्रृङ्गारं स्वयमेव करोति अत एव एष तटवायुः मे अतीव परोपकारी ॥ १६ ॥

**एते वयं सैकतभिन्नशुक्तिपर्यस्तमुक्तापटलं पयोधेः ।**

**प्राप्ता मुहूर्तेन विमानवेगात्कूलं फलावर्जितपूगमालम् ॥ १७॥**

**अन्वयः** -

एते वयं सैकतभिन्नशुक्तिपर्यस्तमुक्तापटलं फलावर्जितपूगमालम् पयोधेः कूलं विमानवेगान्मुहूर्तेन प्राप्ताः ॥ १७ ॥

**तात्पर्यम्**-

अयि प्रियतमे ! अस्माकं विमानं इयता जवेन गगनमार्गम् गाहते यत् क्षणमात्रमेव वयं समुद्रदुकूलं समागताः । अहा ! कीदृशी अभिनवसुषमास्ति अस्य पयोधिपुलिनस्य । अत्र विवृताननाभिः शुक्तिभिः विकीर्णः मुक्ताफलराशयः देदीप्यन्ते , शोभन्ते चात्र अतिशयफलागमेन विनम्राः पूगपादयपंक्तयः ॥ १७ ॥

**कुरुष्व तावत्करभोरु पश्चान्मार्गे मृगप्रेक्षिणि दृष्टिपातम् ।**

**एषा विदूरीभवतः समुद्रात्सकानना निष्पततीव भूमिः ॥ १८॥**

**अन्वयः** –

(हे) करभोरु (हे) मृगप्रेक्षिणि! तावत्पश्चान्मार्गे दृष्टिपातं कुरुष्वैषा सकानना भूमिः विदूरीभवतः समुद्रान्निष्पतति इव ॥ १८ ॥

**तात्पर्यम्** –

हे करभोरु ! मृगमिव नेत्रवति! ईषत् लङ्घितमार्गे दृष्टिपातं कुरुष्व, एषा काननसहिता भूमिः दूरे भवतः सागरान्निष्क्रामतीव आभाति मे ॥ १८ ॥

**प्रथमखण्डः समाप्तः**

## सारांशः

रघुवंशमहाकाव्यं तावत् सूर्यवंशस्य प्रभाववर्णनात्मकं काव्यं भवति। तत्र एकोनविंशतिसर्गाः सन्ति। आदितः ९ सर्गपर्यन्तं दिलीपमारभ्य दशरथपर्यन्तराज्ञां वर्णनं कृतम्। १० सर्गात् १५ सर्गपर्यन्तं भगवतः श्रीरामस्य वर्णनं भवति। तन्मध्ये विद्यमानस्य अस्य त्रयोदशसर्गस्य विषयः भवति लङ्कापुरीतः पुष्पकविमानेन अयोध्यां प्रति पुनः गमनम्। अस्मिन् सर्गे आदितः ६८ श्लोकपर्यन्तं विमाने स्थितः श्रीरामः सीतायै अधो दृश्यमानान् देशान् ऋषीन् जन्तून् अन्यांश्च वर्णयति। अस्मिन् खण्डे च आदितः १८ श्लोकाः सन्ति। अत्र पुष्पकविमानारोहणं आदौ प्रतिपादितम्। तथाहि शब्दाधिकरणे विष्णोः पदात्मके आकाशे पुष्पकविमानेन विगाहामानः सन् सीतायै वर्णनं कर्तुमारब्धवान्। अनन्तरं मया निर्मितः यः सेतुः तेन मलयपर्वतात् द्विधा विभक्तं समुद्रमिदं पश्येति वर्णितम्। ततः परं समुद्रस्य कुतः सागरमिति नामाङ्कनं कृतमिति वर्णितम्। ततः समुद्रादेव मेघः जलमाहृत्य पुनः प्रवर्षति इति कथितम्। अग्रिमे तावत् सर्वव्यापिनः विष्णोः स्वरूपं यथा वा ज्ञातुं न शक्यते तथा अस्य समुद्रस्यापि इति वर्णितम्। स्वनाभौ उत्पन्नेन चतुर्मुखेन स्तूयमानः सन् भगवान् श्रीमन्नारायणः अत्रैव समुद्रे शेते इति वर्णितम्। ततः इन्द्रेण छिन्नपक्षाः शतशः पर्वताः एनं रक्षकं समुद्रमेव शरणंगताः। अनन्तरं आदिवराहः यदा प्रलये भूमिम् उद्धृतवान् तदा समुद्रस्य जलं भूदेव्याः निर्मलश्वेतवस्त्रमिव अभूत् इति वर्णितम्। ततः परं समुद्रः तरङ्गरूपाधरेण स्वपत्नीं नदीं चुम्बति इति वर्णितम्। अग्रिमश्लोके क्रमेण वर्णनं ततः समुद्रे विद्यमानानां मत्स्यानां वर्णनं तथा अन्यजन्तूनां च वर्णनं कृतं भवति। अनन्तरं समुद्रस्य तटे विद्यमानानां शीतवायुमाघ्रातुं समागतवताम् सर्पाणां वर्णनं कृतम्। ततः परं समुद्रे विद्यमानस्य शङ्खस्य वर्णनं कृतम्। सुमद्रस्य उपरि विद्यमानः मेघः मन्दरपर्वतवदस्तीति वर्णनमग्रिमश्लोकेन कृतं भवति। दूरादवलोकने कृते सुमद्रः तमालङ्कीनां कारणेन नीलीचक्रवदाभाति इति वर्णनं कृतं भवति। समुद्रतटे यो वायुः वाति सः पुष्पमकरन्दान् नीत्वा सीतायाः मुखमाभरणत्वेन अलङ्करोति। ततः

विमानस्य वेगात् शतयोजनविस्तीर्णोऽयं समुद्रः क्षणेन तीर्णः इति अस्मिन् श्लोके विद्यमानानां श्लोकानां सारः।

## बोधप्रश्नाः

1. शब्दगुणकं किम् ?
2. केन तुरङ्गं रसातलं सङ्क्रमितम्?
3. विष्णुरिव कः दशसु दिक्षु व्याप्तः?
4. समुद्रः किं पिबति?
5. घनस्य भ्रमनं कस्मात् भवति?

## शब्दावली

1. वेला
2. कूलम्
3. छायापथेन
4. यियक्षोः
5. अनन्यसामान्यकलत्रवृत्तिः
6. चामरत्वम्
7. प्रोतमुखम्
8. बिम्बाधरबद्धतृष्णम्

## सन्दर्भग्रन्थः

1. रघुवंशम् – मोतीलाल् बनारसीदास् ,दिल्ली २००४

## सहायकग्रन्थाः

1. रघुवंशम्- सञ्जीविनीव्याख्यासहितम्, चौखम्बा पब्लिशर्स्, वाराणसी,२००२

2. रघुवंशम् – शिवरामभट्टकृतव्याख्यासहितम्, राष्ट्रियसंस्कृतविश्वविद्यालयः, तिरुपतिः, २०२१

## बोधप्रश्नोत्तराणि

1. आकाशम्
2. कपिलेन
3. समुद्रः
4. सिन्धूः
5. जलस्य आवर्तवेगात्

## अभ्यासप्रश्नाः

1. अस्मिन् खण्डे विद्यमानानां समस्तपदानां विग्रहं लिखत
2. श्लोकोपात्तधातून् उपयुज्य १०० पदप्रयोगान् कुरुत
3. सर्वे श्लोकाः कण्ठस्थीकरणीयाः

# खण्डः २

पाठरचना

- प्रस्तावना
- उद्देश्यम्
- मूलम्
    1. अन्वयः
    2. तात्पर्यम्
- सारांशः
- बोधप्रश्नाः
- शब्दावली
- सन्दर्भग्रन्थः
- सहायकग्रन्थः
- बोधप्रश्नोत्तराणि
- अभ्यासप्रश्नाः

## प्रस्तावना

महाकविः कालिदासः कविकुलगुरुः कविचक्रवर्ति-इत्यादिनाम्ना सुप्रसिद्धः। तेन त्रीणि महाकाव्यानि रचितानि- रघुवंशम्, कुमारसम्भवम्,मेघदूतम् चेति। तत्र आदिमे द्वे काव्ये महाकाव्येषु अन्तर्भवतः। रघुवंशमहाकाव्यं तावत् सूर्यवंशस्य प्रभाववर्णनात्मकं काव्यं भवति। तत्र एकोनविंशतिसर्गाः सन्ति। आदितः ९ सर्गपर्यन्तं दिलीपमारभ्य दशरथपर्यन्तराज्ञां वर्णनं कृतम्। १० सर्गात् १५ सर्गपर्यन्तं भगवतः श्रीरामस्य वर्णनं भवति। तन्मध्ये विद्यमानस्य अस्य त्रयोदशसर्गस्य विषयः भवति लङ्कापुरीतः पुष्पकविमानेन अयोध्यां प्रति पुनः गमनम्। अस्मिन् खण्डे १९ श्लोकात् ३६ श्लोकाः भवन्ति। मेघस्य वर्णनम्,आकाशस्य वर्णनम्,गङ्गायाः वर्णनम्, सीतायाः कृते आभरणमभूत् मेघः इति उत्प्रेक्षणम्,

जनस्थानवर्णनम्, नूपुरपतनस्य वर्णनम, ततः परं कतिपयश्लोकैः रामस्य सीतायाः अपनयानन्तरं यद्दुःखमनुभूतं तस्य वर्णनम्, ततः परं माल्यवत्पर्वतस्य वर्णनम्, त्रिभिः श्लोकैः तच्छिखरस्य वर्णनम्, त्रिभिः श्लोकैः पम्पानद्याः वर्णनम्, आकाशे गच्छतां सारसानां उपमया वर्णनम्, पञ्चवट्याः वर्णनम्, अगस्त्याश्रमवर्णनम्। इमे विषयाः अस्मिन्सर्गे प्रतिपादिताः भवन्ति। बहुत्र उपमालङ्कारेण वर्णनं दृश्यते अतः अलङ्काराध्ययने छात्राणामत्यन्तोपकारो भवति इति निश्चयेन वक्तुं शक्यते।

## उद्देश्यम्

- जनस्थादिदेशानां वर्णनं सरलया रीत्या ज्ञायते
- कालिदासस्य काव्यसौष्ठवमवगच्छति
- विभिन्नालङ्काराणां परिचयो भवति
- शब्दानां धातूनां च प्रयोगोपयोगिता ज्ञायते
- महर्षीणां वर्णनं ज्ञातुं शक्नुमः

**क्वचित्पथा संचरते सुराणां क्वचिद्घनानां पततां क्वचिच्च ।**

**यथाविधो मे मनसोऽभिलाषः प्रवर्तते पश्य तथा विमानम् ॥ १९॥**

**अन्वयः**-

(हे देवि!) विमानं मे मनसः अभिलाषः यथाविधः तथा प्रवर्त्तते पश्य (तथा- हि) क्वचित् सुराणां क्वचित् घनानां क्वचित्पततां च पथा संचरते ॥ १९ ॥

**तात्पर्यम्**-

अयि देवि ! दिव्यशक्तिसम्पन्नत्वात् इदं पुष्पकं विमानं मे अप्रकटिताः हृदयाभिलाषाः अपि वेत्ति। तदनुकूलं च गृह्णाति मार्गम्। क्वचित् देवपथं तत् भजते, क्वचित् मेघमार्गे गच्छति, क्वचिच्च पक्षिपथं अतिक्रामति । यन्मार्गगमनायाहम् इच्छामि, तान् तान् पथः इदं दिव्यशक्तिबलेन अव्यक्तान् मनोन्तर्गतभावान् ज्ञात्वा स्वयमेव प्रयाति ॥ १९ ॥

**असौ महेन्द्रद्विपदानगन्धिस्त्रिमार्गगावीचिविमर्दशीतः ।**

**आकाशवायुर्दिनयौवनोत्थानाचामति स्वेदलवान्मुखे ते ॥ २०॥**

**अन्वयः**-

महेन्द्रद्विपदानगन्धिः त्रिमार्गगावीचिविमर्दशीतः असौ आकाशवायुः दिनयौवनोत्थान् ते मुखे स्वेदलवानाचामति ॥ २० ॥

**तात्पर्यम्**–

देवमार्गेण गच्छता श्रीरामचन्द्रेण वक्ष्यमाणं वाक्यं उक्तम्- " अयि मे हृदयेश्वरि ! सम्प्रति वयं देवमार्गेण गच्छामः । पश्य, असौ ऐरावतमदसुवासितः गगनगङ्गातरङ्गसंसर्गशीतलः आकाशसमीरः तव वदनारविन्दे मध्याह्नसूर्य्यसंतापसम्भवान् प्रस्वेदकणान् शोषयति ॥ २० ॥

**करेण वातायनलम्बितेन स्पृष्टस्त्वया चण्डि कुतूहलिन्या ।**

**आमुञ्चतीवाभरणं द्वितीयमुद्भिन्नविद्युद्वलयो घनस्ते ॥ २१॥**

**अन्वयः** –

हे चण्डि ! कुतूहलिन्या त्वया वातायनलम्बितेन करेण स्पृष्टः उद्भिन्नविद्युद्वलयः घनः ते द्वितीयमाभरणम् आमुञ्चतीव ॥ २१ ॥

**तात्पर्यम्**–

अयि प्रणयप्रकोपनशीले ! अधुना पुष्पकविमानम् मेघमार्गेण सञ्चरते। पश्य, यदा कौतुकवशात् त्वया पुष्पकगवाक्षात् अवस्रंसितेन हस्तकमलेन प्रस्फुटविद्युद्विभूषणः कोऽपि मेघः संस्पृष्टः तदा स पयोधरः ते कोपस्वभावं परिज्ञाय तस्माद्भयभीतो भूत्वा च त्वत्करकमले अपरं एकं विद्युन्मयं कंकणं समर्पयामास तव प्रसादनाय इति आवभासे ॥ २१ ॥

**अमी जनस्थानमपोढविघ्नं मत्वा समारब्धनवोटजानि ।**

**अध्यासते चीरभृतो यथास्वं चिरोज्झितान्याश्रममण्डलानि ॥ २२॥**

**अन्वयः** –

अमी चीरभृतः जनस्थानमपोढविघ्नं मत्वा समारब्धनवोटजानि चिरोज्झितानि आश्रममण्डलानि यथास्वम् अभ्यासते ॥ २२ ॥

**तात्पर्यम्**–

देवि ! सम्मुखे स्थितं एतत् पुण्यम् जनस्थानम् पश्य। पुरा रावणत्रासात् जनस्थाननिवासिनः तपस्विनः जनस्थानं परित्यज्य पलायिताः आसन्। यदा मया राक्षसकुलम् विनाशितम्, तदा ते तपस्विनः जनस्थानम् विघ्नशून्यं अत एव शान्तिनिवासम् परिज्ञाय पुनः प्रत्यावृताः । अधुना ते अत्र स्वेषु स्वेषु आश्रमेषु नवीनकुटीरान् रचयित्वा शान्तिपूर्वकं निवसन्ति तपश्चरन्ति च॥ २२ ॥

**सैषा स्थली यत्र विचिन्वता त्वां भ्रष्टं मया नूपुरमेकमुर्व्याम् ।**

**अदृश्यत त्वच्चरणारविन्दविश्लेषदुःखादिव बद्धमौनम् ॥ २३॥**

**अन्वयः-**

सा स्थली, एषा यत्र त्वां विचिन्वता मया त्वच्चरणारविंदविश्लेषदुःखादिव बद्धमौनमुर्व्यां भ्रष्टम् एकं नूपुरम् अदृश्यत ॥ २३ ॥

**तात्पर्यम्-**

अयि जीवितेश्वरि ! रावणाहृतां त्वां अन्वेषयन् यदा अहम् एतस्मिन् सम्मुखीने स्थाने आगतः तदा यत्र तव पादपतितम् एकं मञ्जीरम् अहम् अपश्यम् । मया शोकमग्नेन तत्काले स नूपुरः एवम् दृष्टः यत् त्वत्पादपद्मविरहकातरो भूत्वा स धूलिधूसरश्च वाणीविहीनः पृथिव्यामुपरि अध्यतिष्ठत् । नाहम् केवलः किन्तु त्वदीयः मञ्जीरोऽपि त्वद्वियोगविधुरः भूत्वा मौनव्रतमवलम्बयत् । स मञ्जीरः यदा तव पापद्मस्थः आसीत् तदा संगीतमयः अतिष्ठत् परन्तु त्वच्चरणात् भ्रष्टः स वियोगव्यथितो भूत्वा एकान्ते मौनमाचचार । एतत्स्थानं दृष्ट्वा मम सैव प्राचीना स्मृतिः संजाता इति ॥ २३ ॥

**त्वं रक्षसा भीरु यतोऽपनीता तं मार्गमेताः कृपया लता मे ।**

**अदर्शयन्वक्तुमशक्नुवत्यः शाखाभिरावर्जितपल्लवाभिः ॥ २४॥**

**अन्वयः-**

(हे) भीरु ! त्वं रक्षसा यतः अपनीता तं मार्गं वक्तुम् अशक्नुवत्यः एताः लताः आवर्जितपल्लवाभिः शाखाभिः कृपया मे अदर्शयन् ॥ २४ ॥

## तात्पर्यम्–

ताः लताः दृष्ट्वा श्रीरामचन्द्रस्य सीतापहरणस्मृतिः संजाता। तदा कथयति श्रीरामचन्द्रः सीतां प्रति " अयिभयशीले! पश्यैताः लताः । यदा रावणः त्वाम् बलपूर्वकं जहार, तदा त्वाम् अन्विष्यन्तं त्वद्वियोगविधुरं मां एताः पुरस्तात् वर्तमानाः लताः वाणीविहीनाः अपि अत्यन्तसहानुभूतिपूर्वकं नमितपल्लवाभिः पाणिभिः तम् मार्गम् अबोध्यन् येन मार्गेण रावणः त्वाम् अनैषीत् । एताभिः लताभिः सह तव सखित्वम् आसीदतिशयम् अनेन कारणेन ताः मह्यम् असह्यदुःखेन सहानुभूतिम् प्रदर्शयामासुः ॥ २४ ॥

**मृग्यश्च दर्भाङ्कुरनिर्व्यपेक्षास्तवागतिज्ञं समबोधयन्माम् ।**

**व्यापारयन्त्यो दिशि दक्षिणस्यामुत्पक्ष्मराजीनि विलोचनानि ॥ २५॥**

## अन्वयः –

दर्भांकुरनिर्व्यपेक्षाः मृग्यः उत्पक्ष्मराजीनि विलोचनानि दक्षिणस्यां दिशि व्यापारयन्त्यः . तवागतिज्ञं मां समबोधयन् ॥ २५॥

## तात्पर्यम्–

पुनरपि उत्प्रेक्षते श्रीरामचन्द्रः - "अयि मे प्राणसमे ! एताः हरिण्याः रावणकृतं तव हरणव्यापार-मपश्यन् । यदाहम् त्वां गवेषयन् तासां पार्श्वेषु अगच्छम् तदाहम् अपश्यम् यत् ताः अपि त्वद्वियोगव्याकुलाः त्वदुपरि पतितस्य दौर्भाग्यवज्राघातस्य दर्शनेन अतिशयशोकाकुलाश्च अतिष्ठन्। तस्मिन्काले ताः दुःखनिमग्नाः हरित्कोमलकुशाङ्कुरानपि नाभक्षयन् । ताः साश्रुऽभिः नयनैः दक्षिणस्यामेव दिशि विलोकयन्त्यः अतिष्ठन् । तदाहं मेने यत् ताः हरिणाङ्गनाः वक्तुम् अशक्नुवन्त्यः अपि त्वद्वियोगविधुराय तव अज्ञातमार्गाय मह्यम् "अनेनैव दक्षिणदिशः मार्गेण तव प्रियतमा अस्माकं प्रियसखी

च उपनीता" इति स्वनयनाकृताभिः चेष्टिताभिः व्यापारयामासुः। ताः मृगाङ्गनाः ते प्रियसख्यः आसन् अत एव ताः अपि मे असह्यसंतापे अतिशयसमवेदना प्रदर्शयामासुः इति ॥ २५ ॥

**एतद्गिरेर्माल्यवतः पुरस्तादाविर्भवत्यम्बरलेखि शृङ्गम् ।**

**नवं पयो यत्र घनैर्मया च त्वद्विप्रयोगाश्रु समं विसृष्टम् ॥ २६॥**

**अन्वयः**-

माल्यवतो गिरेः अंबरलेखि श्रृंगम् एतत्पुरस्तादाविर्भवति यत्र घनैः नवं पयः मया त्वद्विप्रयोगाश्रु च समं विसृष्टम् ॥ २६ ॥

**तात्पर्यम्**–

माल्यवतः दर्शनेन श्रीरामचन्द्रस्य सीताविरहवेदनायाः स्मृतिः संजाता । तदा कथयति भगवान् श्रीरामचन्द्रः "अयि जीवितेश्वरि ! एतस्य सम्मुखीनस्य माल्यवतः गिरेः अम्बरचुम्बि शिखरम् संदृश्यते । यदा त्वम् रावणेन हृता, तदा त्वद्विरहिणा मया अस्मिन्नेव शिखरदेशे वर्षाकालः व्यतीतः । तत्काले विरहवेदनादग्धेन मयापि जलं विमुञ्चद्भिः मेघमण्डलैः सह अश्रुवर्षा कृता। ॥ २६ ॥

**गन्धश्च धाराहतपल्वलानां कादम्बमर्धोद्गतकेसरं च ।**

**स्निग्धाश्च केकाः शिखिनां बभूवुर्यस्मिन्नसह्यानि विना त्वया मे ॥ २७॥**

**अन्वयः** –

यस्मिन्धाराहतपल्वलानां गंधः अर्धोद्गतकेसरं कादम्बं च स्निग्धाः शिखिनां केकाश्च ( इत्येतानि) त्वया विना मेऽसह्यानि बभूवुः ॥ २७ ॥

**तात्पर्यम्**-

पुनरपि स्वानुभूतां सीताविरहवेदनां प्रबोधयति श्रीसोतावल्लभः - अयि हृदयेश्वरि ! त्वया विना वर्षाकालस्य सर्वे रुचिराः पदार्थाः मम अरुचिकराः दुःखदाश्च बभूवुः। वर्षाजलसिक्तानां शुष्कसरोवराणां तलोत्थितः आमोदःघ्राणेन्द्रियप्रियोऽपि मम् त्वदृते घृणास्पदः बभूव । तथैव दर्शनप्रियमपि अर्धविकसितकदम्बकुसुमं त्वद्वियोगे मम नयनशूलं बभूव । श्रुतिमधुराः अपि मयूरवाण्यः मे अतीवपरुषाः संजाताः त्वया विना ॥ २७ ॥

**पूर्वानुभूतं स्मरता च यत्र कम्पोत्तरं भीरु तवोपगूढम् ।**

**गुहाविसारीण्यतिवाहितानि मया कथंचिद्घनगर्जितानि ॥ २८॥**

**अन्वयः**-

(हे) भीरु ! यत्र च पूर्वानुभूतं कम्पोत्तरं तवोपगूढं स्मरता मया गुहाविसारीणि घनगर्जितानि कथंचिदतिवाहितानि ॥ २८ ॥

**तात्पर्यम्**-

माल्यवतः शिखरं दृष्ट्वा भगवतः श्रीरामचन्द्रस्य वर्षाकाले अनुभूतायाः विरहव्यथायाः पूर्वस्मृतिः उपलब्धा तदा प्रवदति श्रीजानकीशः - " हे प्रियतमे ! अत्र माल्यवति पर्वते निवसन्नहम् वर्षा अतिकष्टेन व्यतीयाय । पूर्वस्मिन्काले यदा मेघाः गर्जन्तिस्म, तदा त्वम् भयभीता मां गाढालिङ्गनं प्रकुर्वन्ती अप प्रवेपसेस्म । तव हरणोपरान्ते कियति काले व्यतीते सति यदा वृष्टिसमयः समागतः तदा त्वद्विरहविधुरोऽहम् धनगर्जितानि श्रुत्वा तव पूर्व प्रकम्पप्रधानं आश्लेषम् स्मारं स्मारं अतीवव्यथाम् अप्राप्नुवम् । तस्मिन् वर्णताः आनन्दममागेहे दौर्भाग्यपीडितः त्वया विप्रयुक्तः अहम् तानि घनगर्जितानि सोढुं न समर्थः सन् सास्त्रं विला- पमकु.र्वम् ॥ ॥ २८ ॥

**आसारसिक्तक्षितिबाष्पयोगान्मामक्षिणोद्यत्र विभिन्नकोशैः ।**

**विडम्ब्यमाना नवकन्दलैस्ते विवाहधूमारुणलोचनश्रीः ॥ २९॥**

**अन्वयः**-

यत्र विभिन्नकोशैः नवकन्दलैः आसारसिक्तक्षितिबाष्पयोगाद्विडम्ब्यमाना ते विवाहधूमारुणलोचनश्रीः मामक्षिणोत् ॥ २९ ॥

**तात्पर्यम्-**

अयि मे प्राणवल्लभे! धागसंपातेन आर्द्रवसुन्धरायाः यः धूमः उद्गच्छत् तेन सह अरुणवर्णानां प्रस्फुटितपरागानां नवकन्दलानां यदा संयोगः अभवत्, तदा तेषां नवकन्दलीकुसुमानां सैव अभिनव-श्रीरभूत्, या मम पार्श्वे विवाहमण्डपस्थायाः तव यज्ञधूमसंयोगात् विशाललोचनयोः अरुणमाधुरी प्रादुर्बभूव । तैः कन्दलैः अनुक्रियमाणां तां ललितलक्ष्मी दृष्ट्वा त्वद्विरह व्याकुलोऽहम् अतिशयं विव्यथे।" ॥ २९ ॥

**उपान्तवानीरवनोपगूढान्यालक्षपारिप्लवसारसानि ।**

**दूरावतीर्णा पिबतीव खेदादमूनि पम्पासलिलानि दृष्टिः ॥ ३०॥**

**अन्वयः**-

उपांतवानीरवनोपगूढानि आलक्ष्यपारिप्लवसारेसानि अमूनि पंपासलिलानि दूरावतीर्णा (मे) दृष्टिः (अत एव) खेदात् पिबतीव ॥ ३० ॥

**तात्पर्यम्**-

माल्यवन्तम् पर्वतम् अतिक्रम्यपुष्पकविमानम् समागतं पम्पासरसन्निकटं; तत् दृष्ट्वा प्रोवाच श्रीरामचन्द्रः- "अयि देवि । पश्यैतत् सम्मुखीनं पम्पासरः । तटस्थवञ्जुलवनाच्छादितः ईषद्दृश्यचपलसारसः अयं निर्मलसलिलः पम्पासरोवरः स्वाभिनवश्रिया प्रसादयति मे मनः । दूरात् आयातः शिथिलीभूतसर्वाङ्गः पथिकः शीतलछाया- समन्वितं निर्मलनीरं जलाशयं यथा शीघ्रं परित्यक्तुं नोत्सहते तथैव मे दृष्टिरपि यकाशात् अवतीर्णा अतएव अतिशयश्रमेण खिद्यमाना पम्पायाः निर्मलाव् सलिलात् शीघ्रं प्रत्यावर्तुं न समर्था इति।" ॥ ३० ॥

**अत्राावियुक्तानि रथाङ्गनाम्नामन्योन्यदत्तोत्पलकेसराणि ।**

**द्वन्द्वानि दूरान्तरवर्तिना ते मया प्रिये सस्मितमीक्षितानि ॥ ३१॥**

**अन्वयः** –

(हे) प्रिये ! अत्रान्योन्यदत्तोत्पलकेसराणि अवियुक्तानि रथांगनाम्नां द्वंद्वानि ते दूरान्तरवर्तिना मया सस्पृहमीक्षितानि ॥ ३१ ॥

**तात्पर्यम्**–

पम्पासरोवरं दृष्टा सञ्जाता श्रीरामचन्द्रस्य अन्या सीताविरहानभूतव्यथास्मृतिः, तदा वभाषे श्रीरामचन्द्रः- "प्राणप्रिये! यत्र पम्पासरोवरस्य कूले परस्परं कमलकिअल्फेन सेव्यमानं चक्रवाकयुगलं दृष्ट्या त्वद्वियोगव्यथितस्य मे हृदये 'यहम् त्वया सह अत्र पम्पाकूल स्थिते वन्जुलनिकुञ्जे दाम्पत्य-सुखं अनुभविष्यन् मनोविनोदेन कालं आनयिष्यामि' इत्याकांक्षा समुत्पन्ना । अतएव साभिलाषं दृष्टा मया तेषां चक्रवाकयुगलानां प्रणयलोला ।॥ ३१ ॥

**इमां तटाशोकलतां च तन्वीं स्तनाभिरामस्तबकाभिनम्राम् ।**

**त्वत्प्राप्तिबुद्ध्या परिरब्धुकामः सौमित्रिणा साश्रुरहं निषिद्धः ॥ ३२॥**

**अन्वयः**-

स्तनाभिरामस्तबकाभिनम्रां तन्वीम् इमां तटाशोकलतां त्वत्प्राप्तिबुद्ध्या परिरब्धुकामः अहं सौमित्रिणा साश्रुः निषिद्धः ॥ ३२ ॥

**तात्पर्यम्**-

पुनरपि कथयति सीताविरहव्यथायाः परिपीडनम् श्रीसीतेशः - " अयि हृदयेश्वरी ! त्वद्विरहे मम एषा बुद्धिभ्रान्तिः सञ्जाता यदहम् सुन्दरसुमनगुच्छकावनतां तटस्थितां अशोकवल्लरीम् दृष्ट्वा 'त्वम् पयोधराभिनम्रा प्राप्ता' इति मन्यमानः तां आलिङ्गुतकामः वाष्पसंकुलेन लक्ष्मणेन 'नेयं सीता' इति निवारितः ॥ ३२ ॥

**अमूर्विमानान्तरलम्बिनीनां श्रुत्वा स्वनं काञ्चनकिङ्किणीनाम् ।**

**प्रत्युद्व्रजन्तीव स्वमुत्पतन्त्यो गोदावरीसारसपङ्क्तयस्त्वाम् ॥ ३३॥**

**अन्वयः**-

विमानान्तरलम्बिनीनां काञ्चनकिंकिणीनां स्वनं श्रुत्वा स्वम् उत्पतन्त्यः अमूः गोदावरी-सारससपंक्तयः त्वं प्रत्युद्व्रजन्ति इव ॥ ३३ ॥

**तात्पर्यम्**

हे सीते विमानान्तरलम्बिनीनां सुर्वणकिङ्किणीनां शब्दं श्रुत्वा ऊर्ध्वम् पतन्त्यः अमूः गोदवरीनद्यां विद्यमानाः सारसपङ्क्तयः त्वत्कृते स्वागतं ददाति इव आभाति मम ॥ ३३ ॥

**एषा त्वया पेशलमध्ययाऽपि घटाम्बुसंवर्धितबालचूता ।**

**आनन्दयत्युन्मुखकृष्णसारा दृष्टा चिरात्पञ्चवटी मनो मे ॥ ३४॥**

**अन्वयः**-

पेशलमध्ययाऽपि त्वया घटाम्बुसंवर्धितबालचूता उन्मुखकृष्णसारा चिराद्दृष्टैषा पञ्चवटी मे मनः आनन्दयति ॥ ३४ ॥

**तात्पर्यम्**-

अयि प्रिये! पश्य ! एते वयम् पञ्चवटीम् प्राप्ताः । यत्रैव त्वया मुष्टिमध्यया अत एव भाराक्षमया अपि प्रतिदिनकलशजलसेचनेन एते वालरसालाः परिपालिताः, अस्यामेव पूर्वं त्वया हरितकोमलकुशाङ्कुरदानेन स्वसुताः इव स्नेहेन परिपोषिताः एते कृष्णमृगाः । एतावति काले व्यतीतेऽपि त्वां मातृकल्पां ते न व्यस्मार्षुः अत एव त्वां प्रति उपरि अवलोकयन्ति । अस्माकं प्रणयलीलायाः भूमिः एषा पञ्चवटी बहुकालोपरान्ते अवलोकिता मे हृदयं अतिशयं प्रहर्षयति ॥ ३४ ॥

**अत्रानुगोदं मृगयानिवृत्तस्तरंगवातेन विनीतखेदः ।**

**रहस्त्वदुत्सङ्गनिषण्णमूर्धा स्मरामि वानीरगृहेषु सुप्तः ॥ ३५॥**

**अन्वयः** –

अत्र पंचवट्याम् अनुगोदं मृगयानिवृत्तः तरंगवातेन विनीतखेदः रहस्त्वदुत्संगनिषण्णमूर्द्धा (सन्नहं) वानीरगृहेषु सुप्तः स्मरामि ॥ ३५ ॥

**तात्पर्यम्**-

गोदावरीं दृष्ट्वा पुनरपि भगवतः श्रीरामचन्द्रस्य हृदये सीतासार्धम् उपभुक्तानन्दस्मृतिः प्रतिफलिता, तदा श्रीजानकीवल्लभः उवाच - अयि सीते। अत्र गोदावरीपरिसरे मञ्जुलवञ्जुलनिकुञ्जे आखेटप्रत्यागतः कल्लोलशीतलसमीरेण विगतश्रमः अहम् तव क्रोडे शिरः प्रस्थाप्य आनन्दमयीं निद्रां पूर्वम् उपलब्धवान् इति स्मृतिः मम हृदये एतत् अनुगोदं प्रान्तं दृष्ट्वा उद्बुद्धा । ॥ ३५ ॥

**भ्रूभेदमात्रेण पदान्मघोनः प्रभ्रंशयां यो नहुषं चकार ।**

**तस्याविलाम्भःपरिशुद्धिहेतोर्भौमो मुनेः स्थानपरिग्रहोऽयम् ॥ ३६॥**

**अन्वयः** –

यः भ्रूभेदमात्रेण नहुषं मघोनः पदात् प्रभ्रंशयांचकार आविलाम्भःपरिशुद्धिहेतोः तस्य मुनेरयं भौमः स्थानपरिग्रहः ॥ ३६ ॥

**तात्पर्यम्** –

अयि प्राणप्रिये सीते ! पश्य- अयं पुरस्तात् अखण्डतपोनिधेरगस्त्यस्य पवित्रः पार्थिवः आश्रमः दृश्यते । निखिलतपोधनानां चूडामणिरासीत् स मध्याह्नरविरिव तेजस्वी भृकुटिभङ्गमात्रेण पुरुवंशोद्भवं नहुषं नृपं तपसा समुपलब्धात् इन्द्रपदात् स पातयामास । अगस्त्यनक्षत्राख्यः लोकः अस्ति आकाशमण्डलेऽपि । उदयति च अगस्त्याख्यं नक्षत्रं शरदि ऋतौ तथा च तस्य प्रभावात् वर्षायाः कलुषञ्जलं निर्मलं भवति॥ ३६ ॥

## सारांशः

अस्मिन् खण्डे १९ श्लोकात् ३६ श्लोकाः पाठिताः। तेषां सारस्तु इत्थं भवति- आदौ देवानां आकाशे अत्यन्तमुपरि भवति, ततः अधो भागे मेघाः भवन्ति, ततः अधो भागे पक्षिणः गच्छन्ति इति वस्तुस्थितिः। परन्तु पुष्पकविमानं तावत् रामस्य इच्छानुसारं यथेष्टं गच्छन्तीति वर्णितम्। ततः आकाशेऽस्मिन् यो वायुः वाति सः ऐरावतस्य मदजलगन्धं धरति, पुनः आकाशगंगायाः वीचिसंबन्धात् शीतोऽपि संजातः सन् सीतायाः स्वेदानपोहति इति वर्णितम्। ततः परं यः विद्युत् उपरि भवति सीतायाः

कृते वलयः इव आभाति इति वर्णितम्। अनन्तरं जनस्थानस्य वर्णनं कृतं यस्मात् च पूर्वं ऋषयः राक्षभयात् निर्गताः इदानीं भयात् निवृत्ताः ते यथापूर्वमध्यासते तत्पश्येति रामोवाच इति वर्णितम्। ततः सीतां विचिन्वता रामेण अस्मिन्नेव जनस्थाने एव उभौ एकं नूपुरं दृष्टमिति सीतायै रामोवाचेति वर्णितम् कविना। ततः परं जनस्थाने विद्यमानाः लताः यदा सीता अपहृता तदा एतन्मार्गे एव अपनीता इति द्योतनाय विनीतपल्लवाभिः शाखाभिः दयया मां तं मार्गं दर्शितवन्तः इति रामोवाचेति वर्णितम्। अनन्तरं सीतापहरणजनितदुःखवतः रामस्य हृदयं ज्ञात्वा मृग्यः अपि मां तं मार्गं दर्शितवन्तः इति रामोवाचेति वर्णितम्। अनन्तरं माल्यवान् पर्वतः दृष्टः, तं दृष्ट्वा रामः अवदत्- भवद्वियोगेन अत्रैव शिखरे अरुदमासम्। तदानीं वृष्टिकालः इति कृत्वा मेघोऽपि अवर्षयत् इति वर्णितम्। ततः परं वर्षकारणात् नूतनानि कादम्बपुष्पाणि तथा शिखिनाम् केकाशब्दश्च सन्तोषकारणान्यपि मां असह्यानि अभवन् भवद्वियोगात् इति रामोवाचेति वर्णितम्। ततः पूर्वं वनवाससमये भवती घनगर्जनं श्रुत्वा कम्पनेन मां आलिङ्गनं कृतवती तत्सर्वं स्मृत्वैव कालः यापितः मया अस्मिन्नेव शिखरे रामोवाचेति वर्णितम्। अनन्तरं अस्माकं विवाहसमये होमः अनुष्ठितः तदा भवत्याः नेत्रं रक्तमासीत्। कन्दलपत्राणि अपि तथैव भवन्ति तद्दृष्ट्वैव मम दुःखं वर्धितं भवति इति रामोवाचेति वर्णितम्। ततः परं पम्पानदी दृष्टा परन्तु सा उपरितः स्पष्टतया द्रष्टुं न शक्यते कुतः इति चेत् – वानीरलताभिः सा अपह्नुता भवति। अथापि मध्ये तत्र हंसाः दृष्टाः तदति सुन्दरमस्तीति रामोवाचेति वर्णितम्। ततः परं पम्पानद्यां सारसदम्पती अनेके भवन्ति। ते परस्परं केसरपुष्पाणि समर्पयन्ति स्म तद्धया भवद्वियोगात् कष्टेन दृष्टमिति रामोवाचेति वर्णितम्। ततः परं तत्रैव विद्यमानानां लतानां वर्णनं कृतं भवति। तेन समं रामस्य दुःखमपि वर्णितं भवति। ततः विमानं दृष्ट्वा ते सारसपक्षिणः उपरि आगताः तान् दृष्ट्वा मम एवं भाति "सीतां प्रत्युद्व्रजन्ति" इति रामोवाचेति वर्णितम्। ततः पञ्चवटी प्राप्ता यत्र भवती पूर्वं घटेन जलमाहृत्य आम्रवृक्षान् पालयति स्म, ते वृक्षाः अत्र सन्ति तान् पश्यिति रामोवाच इति वर्णितम् ।अत्रैव गोदावरीनद्यां शीतवायुदत्तसुखानुभवेन या निद्रा कृता तत्सर्वमिदानीं स्मरामि इति रामोवाच इति खण्डस्य सारः।

**बोधप्रश्नाः**

1. विमानं कथं चलति ?

2. सीतायाः द्वितीयमाभरणमिव किमासीत् ?

3. चिरभृतः कुत्र वसन्ति?

4. का नदी रामेण आदौ प्रदर्शिता?

5. कः नहुषं मघोनःपदात् प्रभ्रंशयाञ्चकार?

**शब्दावली**

1. त्रिमार्गगा

2. आभरणम्

3. स्थली

4. शिखिनाम्

5. कम्पोत्तरम्

6. तटाशिकलताम्

7. गोदावरी

8. प्रभ्रंशयाञ्चकार

**सन्दर्भग्रन्थः**

1. रघुवंशम् – मोतीलाल् बनारसीदास् ,दिल्ली २००४

**सहायकग्रन्थाः**

1. रघुवंशम्- सञ्जीविनीव्याख्यासहितम्, चौखम्बा पब्लिशर्स्, वाराणसी,२००२

2. रघुवंशम् – शिवरामभट्टकृतव्याख्यासहितम्, राष्ट्रियसंस्कृतविश्वविद्यालयः, तिरुपतिः, २०२१

## बोधप्रश्नोत्तराणि

1. मनसः अभिलाषः यथा तथा चलति

2. मेघः

3. अपोढविघ्ने जनस्थाने

4. पम्पानदी

5. अगस्त्यः

## अभ्यासप्रश्नाः

1. अस्मिन् खण्डे विद्यमानानां समस्तपदानां विग्रहं लिखत

2. श्लोकोपात्तधातून् उपयुज्य १०० पदप्रयोगान् कुरुत

3. सर्वे श्लोकाः कण्ठस्थीकरणीयाः

# खण्डः ३

पाठरचना

- प्रस्तावना
- उद्देश्यम्
- मूलम्
    1. अन्वयः
    2. तात्पर्यम्
- सारांशः
- बोधप्रश्नाः
- शब्दावली
- सन्दर्भग्रन्थः
- सहायकग्रन्थः
- बोधप्रश्नोत्तराणि
- अभ्यासप्रश्नाः

## प्रस्तावना

महाकविः कालिदासः कविकुलगुरुः कविचक्रवर्ति-इत्यादिनाम्ना सुप्रसिद्धः। तेन त्रीणि महाकाव्यानि रचितानि- रघुवंशम्, कुमारसम्भवम्,मेघदूतम् चेति। तत्र आदिमे द्वे काव्ये महाकाव्येषु अन्तर्भवतः। रघुवंशमहाकाव्यं तावत् सूर्यवंशस्य प्रभाववर्णनात्मकं काव्यं भवति। तत्र एकोनविंशतिसर्गाः सन्ति। आदितः ९ सर्गपर्यन्तं दिलीपमारभ्य दशरथपर्यन्तराज्ञां वर्णनं कृतम्। १० सर्गात् १५ सर्गपर्यन्तं भगवतः श्रीरामस्य वर्णनं भवति। तन्मध्ये विद्यमानस्य अस्य त्रयोदशसर्गस्य विषयः भवति लङ्कापुरीतः पुष्पकविमानेन अयोध्यां प्रति पुनः गमनम्। अस्मिन् खण्डे ३७ श्लोकात् ५३ श्लोकपर्यन्तभागो विद्यते।

आदौ आरब्धस्य अगस्त्याश्रमस्यैव पुनः प्रस्तुतिः भवति। तत्रापि हविषः गन्धः तस्मिन्नाश्रमे सम्पूर्णतया व्याप्य तिष्ठति इति वर्णनं कृतम्। आकाशवायुः सीतायाः स्वेदलवान् आचामति इति वर्णयति रामः। ततः शातकर्णेः आश्रमस्य वर्णनम्, ततः शातकर्णेः चरित्रवर्णनम्, सुतीक्ष्णमहर्षेः वर्णनम्,पूर्वं दृष्टस्य शरभङ्गमहर्षेः माहात्म्यवर्णनम्, ततः मनदाकिनिनद्याः वर्णनम्, मत्रिमहरषेः तपोवनस्य वर्णनम् इति रीत्या रामेण सीतायै बहवो विषयाः प्रतिपादितिः इति कालिदासः वर्णयति ।

## उद्देश्यम्

- अगस्त्यादिऋषीणां आश्रमवर्णनं सरलया रीत्या ज्ञायते
- कालिदासस्य काव्यसौष्ठवमवगच्छति
- विभिन्नालङ्काराणां परिचयो भवति
- शब्दानां प्रयोगोपयोगिता ज्ञायते
- धातूनां प्रयोगोपयोगितां ज्ञातुं शक्नुमः

**त्रेताग्निधूमाग्रमनिन्द्यकीर्तेस्तस्येदमाक्रान्तविमानमार्गम् ।**

**घ्रात्वा हविर्गन्धि रजोविमुक्तः समश्नुते मे लघिमानमात्मा ॥ ३७॥**

## अन्वयः-

अनिंद्यकीर्तेस्तस्याक्रान्तविमानमार्गं हविर्गन्धि त्रेताग्निधूमाग्रं घ्रात्वा रजोविमुक्तः मे आत्मा लघिमानं समश्नुते ॥ ३७ ॥

## तात्पर्यम्-

अयि देवि! पश्य ! उज्ज्वलयशसःआहिताग्नेः महर्षेरगस्त्यस्य हवनद्रव्यसुरभिसंयुक्तया होमाग्नित्रयजनितधूमशिखया अस्माकं विमानमार्गं परिक्रान्तम् । तस्याः सुरभिं समाघ्राय मम आत्मा भारभूतस्य रजोगुणस्य विनाशात् लघुत्वं प्राप्नोति । कीदृश्योऽयं अद्भुतः प्रभावः तपोनिधेः भगवतः

अगस्त्यस्य पवित्रहोमधूमशिखायाः वा? यत् तां समाघ्राय एव मे आत्मा भारभूतस्य रजोगुणस्य विलोपात् अतिशयानन्दमग्नः संजातः । ॥ ३७॥

**एतन्मुनेर्मानिनि शातकर्णेः पञ्चाप्सरो नाम विहारवारि ।**

**आभाति पर्यन्तवनं विदूरान्मेघान्तरालक्ष्यमिवेन्दुबिम्बम् ॥ ३८॥**

**अन्वयः** –

(हे) मानिनि ! शातकर्णेः मुनेः पंचाप्सरो नाम पर्यन्तवनम् एतद्विहारवारि बिदूरात् मेघांतरालक्ष्यमिदुबिंबमिवाभाति ॥ ३८ ॥

**तात्पर्यम्** –

अयि मानवति ! पश्य ! शातकर्णमुनेः सम्मुखीनः वनराजिवेष्ठितः पञ्चाप्सरः नाम क्रीडासरोवरः घनमण्डलावकाशे ईषद्दृश्यं चन्द्रमण्डलमिव प्रतीयते विदूरेण । अत्र तदुग्रतपोभीतेन सुरेन्द्रेण प्रेषिताभिः पञ्चभिः अप्सरोभिः सह हृतहृदयेन अनङ्गमदमत्तेन शातकर्णिमुनिना कृता क्रीडा इति अस्य सरोवरस्य पञ्चाप्सरसंज्ञा ॥ ३८ ॥

**पुरा स दर्भाङ्कुरमात्रवृत्तिश्चरन्मृगैः सार्धमृषिर्मघोना ।**

**समाधिभीतेन किलोपनीतः पञ्चाप्सरोयौवनकूटबन्धम् ॥ ३९॥**

**अन्वयः**-

पुरा दर्भांकुरमात्रवृत्तिः मृगैः सार्द्धं चरन्सः ऋषिः समाधिभीतेन मघोना पंचाप्सरोयौवनकूटबंधम् उपनीतः किल ॥ ३९ ॥

**तात्पर्यम्-**

पुरा अयं शातकर्णिः मुनिः कुशाङ्कुरभक्षणेनैव स्वशरीरं परिपालयन् वन्यैः हरिणसमूहैः सह विचचार । एवं प्रकारेण स सरलं जीवनं व्यतीयाय, उग्रं तपः अतप्स्यच्च । तदा अस्य सांसारिकविलासभोगानभिज्ञस्य महर्षैः अचलसमाधिना भीतेन इन्द्रेण तपोदूषयितुं पञ्चाप्सराः प्रेषिताः; ताश्च तं सरलं ऋषि स्वविलासैः व्यामोह्य तपोभ्रष्टञ्चकुः ॥ ३९ ॥

**तस्यायमन्तर्हितसौधभाजः प्रसक्तसंगीतमृदङ्गघोषः ।**

**वियद्गतः पुष्पकचन्द्रशालाः क्षणं प्रतिश्रुन्मुखराः करोति ॥ ४० ॥**

**अन्वयः-**

अन्तर्हितसौधभाजः तस्यायं प्रसक्तसंगीतमृदंगघोषः वियद्गतः (सन्) पुष्पकचन्द्रशालाः क्षणं प्रतिश्रुन्मुखराः करोति ॥ ४० ॥

**तात्पर्यम्-**

अयं ऋषिः पंचाप्सरो जलतले स्वयोगबलेन लीलामन्दिरं निर्माय तत्रैव ताभिः स्वर्ग-वाराङ्गनाभिः सह अलौकिकां कामक्रीडां करोति । तस्य ऋषेः सङ्गीतस्य मुरजनादः आकाशं प्रसृतः सन् अस्माकं पुष्पकविमानस्य शिरोगृहाणि मुहूर्तमेव प्रतिध्वनितानि करोति ॥ ४० ॥

**हविर्भुजामेधवतां चतुर्णां मध्ये ललाटंतपसप्तसप्तिः ।**

**असौ तपस्यत्यपरस्तपस्वी नाम्ना सुतीक्ष्णश्चरितेन दान्तः ॥ ४१ ॥**

**अन्वयः –**

नाम्ना सुतीक्ष्णः चारतेन दान्तः असौ अपरः तपस्वी एधवतां चतुर्णां हविर्भुजां मध्ये ललाटन्तपसप्तसप्तिः (सन्) तपस्यति ॥ ४१ ॥

**तात्पर्यम् –**

"देवि! सम्मुखीनः एषः अपरः तपस्वी सुतीक्ष्णनामा किन्तु सौम्यचरित्रः चतुर्दिशं काष्ठप्रदीप्तं अग्निचतुष्टयं प्रज्वाल्य प्रभाकरनिबद्धदृष्टिः सन् पञ्चाग्निसाधनं नाम उग्रतपः तपश्चरति॥ ४१ ॥

**अमुं सहासप्रहितेक्षणानि व्याजार्धसंदर्शितमेखलानि ।**

**नालं विकर्तुं जनितेन्द्रशङ्कं सुराङ्गनाविभ्रमचेष्टितानि ॥ ४२॥**

**अन्वयः –**

जनितेन्द्रशंकममुं सहासप्रहितेक्षणानि व्याजार्धसंदर्शितमेखलानि सुरांगनाविभ्रमचेष्टितानि विकर्तुं नालं (बभूवुः) ॥ ४२ ॥

**तात्पर्यम् –**

प्रियतमे! समाधिभीतेन देवराजेन प्रेषिताः सस्मितसंवालितलोचनाः ईषत्प्रदर्शितकटिभूषणाः विलासलीलाकुशलाः स्वर्गवाराङ्गनाः तस्य अखण्डसमाधेः सुतीक्ष्णमुनेः मनसि किञ्चिदपि विकारं उत्पादयितुं न समर्थाः बभूवुः ॥ ४२॥

**एषोऽक्षमालावलयं मृगाणां कण्डूयितारं कुशसूचिलावम् ।**

**सभाजने मे भुजमूर्ध्वबाहुः सव्येतरं प्राध्वमितः प्रयुङ्क्ते ॥ ४३॥**

**अन्वयः –**

ऊर्ध्वबाहुः एषः अक्षमालावलयं मृगाणां कण्डूयितारं कुशसूचिलावं सव्येतरं भुजं मे सभाजने इतः प्राध्वं प्रयुङ्क्ते। ॥ ४३॥

**तात्पर्यम्-**

अयं ऊर्ध्वबाहुः ऋषिः स्वस्य जपमालाविभूषितबाहुम् उपरि प्रसार्य्य माम् अभिनन्दति । अनेनैव बाहुना स भूतदयावशात् मृगाणां गात्राणि खर्जयति छिनत्ति च नित्यकर्मसम्पादनार्थम् कुशाङ्कुरान् ॥ ४३॥

**वाचंयमत्वात्प्रणतिं ममैष कम्पेन किञ्चित्प्रतिगृह्य मूर्ध्नः ।**

**दृष्टिं विमानव्यवधानमुक्तां पुनः सहस्रार्चिषि संनिधत्ते ॥ ४४॥**

**अन्वयः-**

एषः वाचंयमत्वान्मम प्रणतिं मूर्ध्नः किंचित्कम्पेन प्रतिगृह्य विमानव्यवधानमुक्तां दृष्टिं पुनः सहस्रार्चिषि संनिधत्ते ॥ ४४ ॥

**तात्पर्यम्-**

हे प्रिये ! एष मौनव्रतधारी ऋषिः मम् प्रणामम् शिरसः ईषत् सञ्चालनेन स्वीकरोति । अस्माकं विमानेन अस्य ऋषेः दृष्टिपथं क्षणं अवरुद्धम्। पश्चाद्यथा तत् अपक्रान्तम् तदा स मुनिः पुनः सहस्रांशौ दृष्टिं प्रयुंक्ते । ॥ ४४ ॥

**अदः शरण्यं शरभङ्गनाम्नस्तपोवनं पावनमाहिताग्नेः ।**

**चिराय संतर्प्य समिद्भिरग्निं यो मन्त्रपूतां तनुमप्यहौषीत् ॥ ४५॥**

**अन्वयः** –

शरण्यं पावनम् अदः तपोवनम् आहिताग्नेः शरभंगनाम्नः यः चिरायाग्निं समिद्भिः सन्तर्प्य मन्त्रपूतां तनुमप्यहौषीत् ॥ ४५ ॥

**तात्पर्यम्**–

अयि भगवति ! अमुम् सम्मुखीनम् पवित्रम् आगन्तुकानां आश्रयम् आश्रमम् पश्य । अस्याधिष्ठाता महामुनिः शरभङ्गाभिधानः । असौ आहिताग्निः महर्षिः बहुकालम् भगवन्तम् हुताशनम् समर्थ्य समिद्भिः परितोष्य च पुनः स्वकीयम् मन्त्रशुद्धम् शरीरमपि तस्मै समर्पयामास ॥" ॥ ४५ ॥

**छायाविनीताध्वपरिश्रमेषु भूयिष्ठसंभाव्यफलेष्वमीषु ।**

**तस्यातिथीनामधुना सपर्या स्थिता सुपुत्रेष्विव पादपेषु ॥ ४६॥**

**अन्वयः** –

अधुना तस्यातिथीनां सपर्या छायाविनीताध्वपरिश्रमेषु भूयिष्ठसंभाव्यफलेषु अमीषु पादपेषु सुपुत्रेषु इव स्थिता ॥ ४६ ॥

**तात्पर्यम्-**

देवि ! शरभङ्गे परलोके गते सति अस्मिन्काले एते प्रवृद्धाः आश्रमवृक्षाः सुलुताः इव अतिथीनां परिचर्यां कुर्वन्ति । ते क्लान्तानां पथिकानां शैथिल्यम् अपनयन्ति परितोषयन्ति च तेभ्यः

बहुलमधुरफलार्पणेन । यथा सुपुत्राः स्वगुरौ स्वर्गे गते सति अतिथिधर्मम् परिपालयन्ति तथैव एते आश्रमपादपाः एतेषां अधिष्ठातुः अनुपस्थितौ तस्य पदाङ्कमनुसरन्तः अधुनाऽपि आगतेभ्यः अतिथिभ्यः छायाफलानि समर्प्य समर्चयन्ति ॥ ४६ ॥

**धारास्वनोद्गारिदरीमुखोऽसौ शृङ्गाग्रलग्नाम्बुदवप्रपङ्कः ।**

**बध्नाति मे बन्धुरगात्रि चक्षुर्दृप्तः ककुद्मानिव चित्रकूटः ॥ ४७॥**

**अन्वयः-**

धारास्वनोद्गारिदरीमुखः श्रृंगाग्रलग्नांबुदवप्रपंकः असौ चित्रकूटः (हे) बंधुरगात्रि! दृप्तः ककुद्मानिव मे चक्षुः बध्नाति ॥ ४७ ॥

**तात्पर्यम्-**

अयि कान्तकलेबरे ! असौ चित्रकूटः मम दृष्टिम् आनन्दयति प्रतीयते च एषः मदोद्धतः वृषभः इव । जलधाराणां यः गम्भीरनिनादः गुहामुखेभ्यः निस्सरति स एव वृषभवदनात् विनिर्गतं घोरगर्जनम् । शिखरसंयुक्तः एष श्यामलजलदः वप्रक्रीडायां वृषभश्रृङ्गयोः संलग्नः पङ्कः इव आभाति ॥ ४७ ॥

**एषा प्रसन्नस्तिमितप्रवाहा सरिद्विदूरान्तरभावतन्वी ।**

**मन्दाकिनी भाति नगोपकण्ठे मुक्तावली कण्ठगतेव भूमेः ॥ ४८॥**

**अन्वयः –**

प्रसन्नस्तिमितप्रवाहा विदूरान्तरभावतन्वी मंदाकिनी (नाम) एषा सरिन्नगोपकण्ठे भूमेः कंठगता मुक्तावलीव भाति ॥ ४८ ॥

**तात्पर्यम्-**

अयि प्रिये! एतस्य चित्रकूटस्य समीपे प्रवाहिनीम् एताम् मन्दाकिनीं काञ्चिन्नदीं पश्य । पषा निर्मलसलिला निश्चलप्रवाहा च दूरात् एषा दृश्यते अतिकृशा । प्रतीयते च भगवत्याः वसुन्धरायाः कण्ठे शोभमाना मौक्तिकमाला इव ॥ ४८ ॥

**अयं सुजातोऽनुगिरं तमालः प्रवालमादाय सुगन्धि यस्य ।**

**यवाङ्कुरापाण्डुकपोलशोभी मयाऽवतंसः परिकल्पितस्ते ॥ ४९॥**

**अन्वयः –**

अनुगिरं सुजातः अयं तमालः (दृश्यते इति शेषः) यस्य सुगन्धिप्रवालमादाय मया ते यवांकुरापाण्डुकपोलशोभि अवतंसः परिकल्पितः ॥ ४९ ॥

**तात्पर्यम्-**

देवि ! पश्य। एष स एव तमालपादपः यस्य सुरभि नवपल्लवम् गृहीत्वा मया तव कर्णभूषणः निर्मितः । स कर्णभूषणः तव नवयवांकुरापीतकपोलतले अतीव शोभनः अप्रतीयत् । ॥ ४९ ॥

**अनिग्रहत्रासविनीतसत्त्वमपुष्पलिङ्गात्फलबन्धिवृक्षम् ।**

**वनं तपःसाधनमेतदत्रेराविष्कृतोदग्रतरप्रभावम् ॥ ५०॥**

**अन्वयः –**

अनिग्रहत्रासविनतिसत्त्वम् अपुष्पलिंगात्फलबन्धिवृक्षम् आविष्कृतोदग्रतरप्रभावम् अत्रेः तपःसाधनम् एतद्वनम् ॥ ५० ॥

**तात्पर्यम्-**

अयि! एषः सम्मुखीनः महर्षेः अत्रेः आश्रमः दृश्यते। अत्र तपोवने परिदृश्यते भगवतः अत्रेः तपोमहिम्नः पुण्यतमः प्रकाशः । अत्रच दाडभयं विनाऽपि सर्वे श्वापदाः प्रशान्ताः निवसन्ति, पुष्पोद्गमनात् ऋतेऽपि पादपाः फलवन्ताः भवन्त्यत्र । अत एव कीदृशः तपोसाधनायाः प्रकृष्टप्रभावः परिदृश्यतेऽत्र इति मम मनः चिन्तयति ॥ ५० ॥

**अत्राभिषेकाय तपोधनानां सप्तर्षिहस्तोद्धृतहेमपद्माम् ।**

**प्रवर्तयामास किलानसूया तिस्रोतसं त्र्यम्बकमौलिमालाम् ॥ ५१॥**

**अन्वयः** –

अत्र अनुसूया सप्तर्षिहस्तोद्धृतहेमपद्मां त्र्यंबकमौलिमालां तिस्स्रोतसं तपोधनानाम् अभिषेकाय प्रवर्तयामास किल ॥ ५१ ॥

**तात्पर्यम्-**

अयि देवि, पश्य अखण्डपातिव्रतस्य पुण्यप्रभावम् । अस्य आश्रमस्यान्तिके सतीशीर्षस्थानीया भगवती अत्रिजाया अनुसूया स्वतपःप्रभावात् जगति अनावृष्टिसंतापदग्धे सति तपस्विनां स्नानाय नित्यकर्मसम्पादनाय च स्ववाहिनीं त्रिपथगामिनीं सप्तार्षिवर्चितकाञ्चनकमलाम् चन्द्रचूडचूडामणिमालाम् मन्दाकिनीं प्रवर्तयाञ्चकार ॥ ५१ ॥

**वीरासनैर्ध्यानजुषामृषीणाममी समध्यासितवेदिमध्याः ।**

**निवातनिष्कम्पतया विभान्ति योगाधिरूढा इव शाखिनोऽपि ॥ ५२॥**

**अन्वयः**-

वीरासनैः ध्यानजुषामृषीणां (सम्बन्धिनः) समध्यासितवेदिमध्या अमी शाखिनोऽपि निवातनिष्कंपतया योगाधिरूढा इव विभान्ति ॥ ५२ ॥

**तात्पर्यम्**-

देवि ! अस्य आश्रमस्य वेदिकायाः केन्द्रस्थाने यान् वृक्षान् त्वं पश्यसि, तव पूर्वैः वीरासनस्थितैः समाधिमग्नैः ऋषिभिः तत्र आरोपिताः । अधुना वायुः शान्तः अस्ति, अतः एते वृक्षाः अपि निश्चलपल्लवाः तिष्ठन्ति । मन्ये एते पादपाः अपि ध्यानमग्नाः योगिनः इव ॥ ५२ ॥

**त्वया पुरस्तादुपयाचितो यः सोऽयं वटः श्याम इति प्रतीतः ।**

**राशिर्मणीनामिव गारुडानां सपद्मरागः फलितो विभाति ॥ ५३॥**

**अन्वयः**-

श्याम इति प्रतीतः अयं वटवृक्षः पुरस्तात् त्वया यः उपयाचितः स वटोऽयं फलितः सन् सपद्मरागो गारुडानां मणीनां राशि रिव विभाति ॥ ५३ ॥

**तात्पर्यम्**-

अयि! एष सम्मुखीनः स एव श्यामाभिधानः न्यग्रोधपादपः यं त्वम् पूर्व मम कुशलकामनायै प्रार्थितवती । अधुना स वर्तते फलवान् प्रतीयते च पद्मरागग्रथितः मरकतमणिपुञ्ज इव ॥ ५३ ॥

**सारांशः**

अस्मिन् खण्डे आदौ अगस्त्यमहर्षेः वर्णनं कृतं भवति। तथाहि – अगस्त्यकृतहोमजनितधूमानामाघ्रातेन मम मनः रजोगुणं त्यक्त्वा लघुत्वमश्नुते इति रामोवाच इति वर्णितम्। अनन्तरं शातकर्णिमहर्षेः प्रस्तावः आरब्धः, तत्र एकं सरः विद्यते तत्रैव तस्य महर्षेः जलक्रीडा भवति। तत्परितः चतुर्षु दिक्षु गाढकाननं विद्यते, मध्ये विद्यमानत्वादिं सरः मेघेषु श्वेतचन्द्र इव दृश्यते इति वर्णितम्। ततः परं शातकर्णिः पूर्वं मृगेण सह रममाणः आसीत् पश्चात् इन्द्रेण प्रेषिताऽप्सरसा पीडितः सन् अत्र तया रमते इति वर्णितम्। अस्मात् सरसः मृदङ्गध्वनिः पुष्पकविमानपर्यन्तमागच्छति इति अनन्तरं वर्णितम्। ततः परं सुतीक्ष्णमहर्षेः प्रस्तावः भवति। तत्र च अयं नाम्ना सुतीक्ष्णः पोरन्तु चरित्रात् शान्तः इति आदौ उक्त्वा अनन्तरं सः चतुर्षु दिक्षु अग्निं संस्थाप्य पञ्चमाग्निमिव आस्ते इति वर्णितम्। ततः परं तस्य आश्रमस्य वर्णनं कृतम्। ततः अप्सराः कामेन तान् जेतुमागताः सत्यः अपि यथा पराजिताः तथा अत्र वर्णितम् भवति।सः सुतीक्ष्णः मां सभाजयितुं स्वहस्तमूर्ध्वं प्रयुङ्क्ते इति रामोवाचेति वर्णितम्।तस्य तपः अपि अग्रिमश्लोके वर्णितं भवति। अनन्तरं आहिताग्नेः शरभङ्गनाम्नः महर्षेः तपोवनं प्राप्तं तस्य वर्णनमारब्धम्। तथाहि – अयं मुनिः अग्निना सह स्वमपि हविष्ट्वेन समर्पितवानिति वर्णितम्। ततः परं सः शरभङ्गः यद्यपि इदानीं नास्ति तथापि तस्य पुत्राः इव ये वृक्षाः आसन् ते उन्नतमफलानि दत्वा अतिथिपूजां कुर्वन्ति अतः तान् पश्येति रामोवाच इति वर्णितम्।ततः चित्रकूटगिरिः प्राप्तः, सः गर्जितवृषभ इव आसीत् इति वर्णयाञ्चकार।तत्रैव पार्श्वे मन्दाकिनी नदी

प्रवहति। सा च नदी दूराद्दर्शने कृते सा भूदेव्याः एका मुक्तामाला इव आसीत् इति वर्णितम्। तस्मिन्नेव पर्वते कृष्णवर्णतमालो विद्यते तदीयोप्रवालमादायैव पूर्वं यवाङ्कुरवत् मया भवत्कपोलेषु आभरणं परिकल्पितम्। ततः अत्रिमहर्षेः तपोवनस्य वर्णनं भवति। तत्र मुनेः तपःप्रभावात् पुष्पानि विहाय फलानि आयान्ति, प्राणिनः परस्परं स्निहन्ति इति वर्णितम्। तस्य पतनी अनसूया सपतर्षीणां कृते स्नानाय गंगाजमंप्रवर्तयामास इति वर्णितम्। वीरासनेषु स्थित्वा महर्षयः यथा निष्कम्पाः भवन्तयि तथा अस्य तपोवनस्य वृक्षाः अपि निष्कम्पाः आसन्निति वर्णितम्। अन्ते यमुनानद्याः तरणं कृत्वाश्यामाख्यदेशं प्राप। तत्रैव पूर्वं सीता रामस्य वनवासस्य जयं प्रार्थनां स्वीकृतवती इति वर्णितम्।

## बोधप्रश्नाः

1. पद्माप्सरो नाम विहारवारि कस्य विद्यते?

2. कः अग्निं शरणं गतः?

3. चित्रकूटपर्वतः कथमासीत्?

4. अनसूया कस्य पत्नी?

5. श्यामः वटः कथं विभाति ?

## शब्दावली

1. प्रसन्नसलिले

2.अक्षमालावलयम्

3. सपर्या

4. चित्रकूटः

5. मुक्तावली

6. तिस्रोतसम्

7. योगाधिरूढाः

8. सपद्मरागः

## सन्दर्भग्रन्थः

1. रघुवंशम् – मोतीलाल् बनारसीदास् ,दिल्ली २००४

## सहायकग्रन्थाः

1. रघुवंशम्- सञ्जीविनीव्याख्यासहितम्, चौखम्बा पब्लिशर्स्, वाराणसी,२००२

2. रघुवंशम् – शिवरामभट्टकृतव्याख्यासहितम्, राष्ट्रियसंस्कृतविश्वविद्यालयः, तिरुपतिः, २०२१

## बोधप्रश्नोत्तराणि

1. शातकर्णिमहर्षेः

2. शरभङ्गमहर्षिः

3. ककुद्मानिव

4. अत्रिमहर्षेः

5. सपद्मरागःगारुडानां मणीनां राशीः इव

## अभ्यासप्रश्नाः

1. अस्मिन् खण्डे विद्यमानानां समस्तपदानां विग्रहं लिखत

2. श्लोकोपात्तधातून् उपयुज्य १०० पदप्रयोगान् कुरुत

3. सर्वे श्लोकाः कण्ठस्थीकरणीयाः

# खण्डः ४

पाठरचना

- प्रस्तावना
- उद्देश्यम्
- मूलम्
    1. अन्वयः
    2. तात्पर्यम्
- सारांशः
- बोधप्रश्नाः
- शब्दावली
- सन्दर्भग्रन्थः
- सहायकग्रन्थः
- बोधप्रश्नोत्तराणि
- अभ्यासप्रश्नाः

## प्रस्तावना

महाकविः कालिदासः कविकुलगुरुः कविचक्रवर्ति-इत्यादिनाम्ना सुप्रसिद्धः। तेन त्रीणि महाकाव्यानि रचितानि- रघुवंशम्, कुमारसम्भवम्,मेघदूतम् चेति। तत्र आदिमे द्वे काव्ये महाकाव्येषु अन्तर्भवतः। रघुवंशमहाकाव्यं तावत् सूर्यवंशस्य प्रभाववर्णनात्मकं काव्यं भवति। तत्र एकोनविंशतिसर्गाः सन्ति। आदितः ९ सर्गपर्यन्तं दिलीपमारभ्य दशरथपर्यन्तराज्ञां वर्णनं कृतम्। १० सर्गात् १५ सर्गपर्यन्तं भगवतः श्रीरामस्य वर्णनं भवति। तन्मध्ये विद्यमानस्य अस्य त्रयोदशसर्गस्य विषयः भवति लङ्कापुरीतः पुष्पकविमानेन अयोध्यां प्रति पुनः गमनम्। अस्मिन् खण्डे ५४ श्लोकात् ६५

श्लोकपर्यन्तभागः विद्यते। तत्र च आदितः चतुर्भिः श्लोकैः गंगायमुनयोः संगमस्य वर्णनं भवति। ततः तत्संगमस्थाने स्नानं मोक्षं प्रयच्छति इति वर्णनम्, ततः श्रृङ्गिबेरपुरं दृष्ट्वा तत्र विद्यमानस्य गुहस्य तथा पूर्वजातकथायाः स्मारणमपि रामेण कृतम्। ततः परं चतुर्भिः श्लोकैः सरयूनद्याः वर्णनं भवति। रामः अयोध्यां प्रति समागतः इति सूचनाय हनूमतः प्रेषणम् तदनन्तरं ससैन्यस्य भरतस्य आगमनं च प्रतिपादितं भवति।

## उद्देश्यम्

- गंगायमुनासंगमस्य वर्णनं सरलया रीत्या ज्ञायते
- कालिदासस्य काव्यसौष्ठवमवगच्छति
- विभिन्नालङ्काराणां परिचयो भवति
- शब्दानां  प्रयोगोपयोगिता ज्ञायते
- धातूनां प्रयोगोपयोगितां ज्ञातुं शक्नुमः

**क्वचित्प्रभालेपिभिरिन्द्रनीलैर्मुक्तामयी यष्टिरिवानुविद्धा ।**

**अन्यत्र माला सितपङ्कजानामिन्दीवरैरुत्खचितान्तरेव ॥ ५४॥**

**क्वचित्खगानां प्रियमानसानां कादम्बसंसर्गवतीव पङ्क्तिः ।**

**अन्यत्र कालागुरुदत्तपत्रा भक्तिर्भुवश्चन्दनकल्पितेव ॥ ५५॥**

**क्वचित्प्रभा चान्द्रमसी तमोभिश्छायाविलीनैः शबलीकृतेव ।**

**अन्यत्र शुभ्रा शरदभ्रलेखा रन्ध्रेष्विवालक्ष्यनभःप्रदेशा ॥ ५६॥**

**क्वचिच्च कृष्णोरगभूषणेव भस्माङ्गरागा तनुरीश्वरस्य ।**

**पश्यानवद्याङ्गि विभाति गङ्गा भिन्नप्रवाहा यमुनातरङ्गैः ॥ ५७॥**

**अन्वयः** –

हे अनवद्यांगि ! यमुनातरंगैः भिन्नप्रवाहा गंगा कचित्प्रभालेपिभिरिन्द्रनीलैरनुविद्धा मुक्तामयी यष्टिरिवान्यत्रेन्दीवरैरुत्खचितान्तरा सितपंकजानां मालेव क्वचित् कादम्बसंसर्गवती प्रियमानसानां खगानां पंक्तिरिव अन्यत्र कालागुरुदत्तपत्रा चन्दनकल्पिता भुवः भक्तिरिव क्वचिच्छायाविलीनैः तमोभिः शबलीकृता चान्द्रमसी प्रभेवान्यत्र रन्ध्रेषु आलक्ष्यनभः प्रदेशा शरदभ्रलेखेव क्वचिच्च कृष्णोरगभूषणा भस्मांगरागा ईश्वरस्य तनुरिव विभाति त्वं पश्य ॥ ५४ ॥ ५५ ॥ ५६ ॥ ५७ ॥

## तात्पर्यम्-

अयि मनोरमे । सम्प्रति वयं प्रयागं आगताः पश्य ! यमुनायाः गङ्गायाश्च सम्मेलनस्य अभिनव-सौन्दर्यम्। कलिन्दनन्दिन्याः कल्लोलैः व्यामिश्रसलिला मन्दाकिनी क्वचित्प्रदेशे कान्तिमद्भिः इन्द्रनीलैः सहगुम्फिता मौक्तिकमाला इव शोभते अन्यत्प्रदेशे च सा सुरसरित् नीलपद्मैः ग्रथितम् श्वेतकमलमाल्यम् इन विभाति। ॥५४ ॥

पुनरपि उत्प्रेक्षते जगदीश्वरः रामचन्द्रः- "अयि सुन्दरि सीते! पश्य ! सूर्यतनयायाः कल्लोलैः व्यामिश्रनीरा गङ्गा क्वचित्प्रदेशे कृष्णहंसग्रथिता राजहंसानाम् श्रेणिः इव विभाति अन्यत्प्रदेशे च देव्याः वसुन्धरायाः वदनमण्डले कृष्णारुणा अङ्कितमकरिका श्रीखण्डश्रृङ्गाररचना इन शोभते ॥५५ ॥

अयि चारुचन्द्रवदने । एषा गङ्गा क्वचित्प्रदेशे छायोत्पादितैः अन्धकारः चित्रिता चन्द्रिका इव शोभते । अन्यत्प्रदेशे सा अन्तरालेषु अदृश्यमानैः नीलगगनखण्डैः खचिता शरन्मेघमाला इव विभाति ॥५६ ॥

देवि ! सा अन्यत्प्रदेशे भूतिभूषिता कृष्णव्यालालङ्कारा भगवतः शङ्करस्य शरीरश्रीः इव शोभते ॥५७ ॥

**समुद्रपत्न्योर्जलसंनिपाते पूतात्मनामत्र किलाभिषेकात् ।**

**तत्त्वावबोधेन विनापि भूयस्तनुत्यजां नास्ति शरीरबन्धः ॥ ५८॥**

**अन्वयः**-

अत्र समुद्रपत्न्योः जलसंनिपाते अभिषेकात्पूतात्मनां तनुत्यजां तत्त्वाबोधेन विनापि भूयः शरीरबन्धः नास्ति किल ॥ ५८ ॥

**तात्पर्यम्**-

अयि जनकतनये ! तीर्थराजप्रान्तवाहिन्योः गङ्गायमुनयोः पावनस्य संगमस्य आश्चर्यप्रभावः अस्ति । "ऋते ज्ञानात् न मुक्तिः" इति श्रुत्यादेशः परन्तु अत्र गङ्गायमुनसङ्गमे स्नानात् शुद्धात्मा जनः तत्वज्ञानस्योपब्धिना विनापि मरणान्तरं जन्मबन्धनात् विमुच्यते ॥ ५८ ॥

**पुरं निषादाधिपतेरिदं तद्यस्मिन्मया मौलिमणिं विहाय ।**

**जटासु बद्धास्वरुदत्सुमन्त्रः कैकेयि कामाः फलितास्तवेति ॥ ५९॥**

**अन्वयः**-

निषादाधिपतेः तत्पुरम् इदं यस्मिन्मया मौलिमणिं विहाय जटासु बद्धासु (सतीषु) सुमन्त्रः (हे) कैकेयि ! तव कामाः फलिताः इति अरुदत् ॥ ५९ ॥

**तात्पर्यम्**-

प्रिये! सम्प्रति वयं निषादराजस्य नगरं शृङ्गवराभिधानं सम्प्राप्ताः। अत्रैव गुहराजस्य नगरे यदा मया चूडामणिम् परित्यज्य जटाः बद्धाः तदा "हे कैकयि! अद्य ते दुरभिसन्धयः सफलीभूताः" इति जल्पन् मम पितुःसखा सुमन्त्रः दुखाभिभूतः सन् उच्चैःस्वरैः रुरोद ॥ ५९ ॥

**पयोधरैः पुण्यजनाङ्गनानां निर्विष्टहेमाम्बुजरेणु यस्याः ।**

**ब्राह्मं सरः कारणमाप्तवाचो बुद्धेरिवाव्यक्तमुदाहरन्ति ॥ ६० ॥**

**अन्वयः –**

पुण्यजनांगनानां पयोधरैः निर्विष्टहेमांबुजरेणु ब्राह्मं सरः यस्याः बुद्धेः अव्यक्तमिव कारणम् आप्तवाचः उदाहरन्ति ॥ ६० ॥

**तात्पर्यम् –**

देवि! एषा सम्मुखीना पुण्यसलिला भगवती सरयूः दृश्यते । दुर्गमः मानसरोवरः यत्र यक्षाङ्गनाः तस्य कनककमलानां परागैः स्वस्तनमण्डलानि विभूषयन्ति अस्याः सरय्व्याः मूलोद्भवं अस्ति इति वदन्ति नित्यसत्यवादिनः ऋषयः । वयन्तु साधारणजनाः तं दुर्गमं मानसरोवरं अधिगन्तुम् असमर्थाः अत एव तेषां सर्वज्ञानाम् ऋषीणाम् आप्तवाक्ये तथैव विश्वासं प्रस्थापयामः यथा मूलप्रकृतिः बुद्धेः मूलकारणाम्' इति तेषां आप्तवाक्ये विश्वसन्तः तस्य सत्यतां न शङ्कामहे ॥ ६० ॥

**जलानि या तीरनिखातयूपा वहत्ययोध्यामनु राजधानीम् ।**

**तुरंगमेधावभृथावतीर्णैरिक्ष्वाकुभिः पुण्यतरीकृतानि ॥ ६१ ॥**

**अन्वयः-**

तीरनिखातयूपा या तुरंगमेधावभृथावतीर्णैः इक्ष्वाकुभिः पुण्यतरीकृतानि जलानि अयोध्यां राजधानीम् अनु वहति ॥ ६१ ॥

**तात्पर्यम्**-

हे पुण्यशीले ! पश्य! अस्याः सरव्याः कूले यज्ञपशूनां बन्धनाय दारुस्तम्भाः वर्तन्ते । अश्वमेध-यज्ञसमाप्तौ अवभृथस्नानार्थं अस्याः सलिलेषु प्रविशद्भिः पूतकलबरैः अस्माकं पूर्वपुरुषैः इक्ष्वाकुभिः अस्याः वारीणि पवित्रीकृतानि ॥ ६१ ॥

**यां सैकतोत्सङ्गसुखोचितानां प्राज्यैः पयोभिः परिवर्धितानाम् ।**

**सामान्यधात्रीमिव मानसं मे संभावयत्युत्तरकोसलानाम् ॥ ६२॥**

**अन्वयः** -

यां मे मानसं (कर्तृ) सैकतोत्संगसुखोचितानां प्रान्यैः पयोभिः परिवर्द्धितानाम् उत्तरकोसलानां सामान्यधात्रीमिव संभावयति ॥ ६२ ॥

**तात्पर्यम्**-

देवि ! मन्ये एषा सरयूनदी मम उत्तरकोशलवासिनाञ्च वन्दनीया सामान्या जननी । यथा मातृक्रोडः सुतस्य आनन्दप्रदः तथैव मया च उत्तरकोशलवासिभिश्च अस्याः सिकतामये क्रोडदुकूले अशेषाः आनन्दाः उपलब्धाः परिपोषितानि च मम उत्तरकोशलानाञ्च शरीराणि अस्याः प्रभूतैः पयःकल्पैः सलिलैः ॥ ६२ ॥

**सेयं मदीया जननीव तेन मान्येन राज्ञा सरयूर्वियुक्ता ।**

**दूरे वसन्तं शिशिरानिलैर्मां तरंगहस्तैरुपगूहतीव ॥ ६३॥**

**अन्वयः –**

मदीया जननीव मान्येन तेन राज्ञा वियुक्ता सेयं सरयूः दूरे वसन्तं मां शिशिरानिलैः तरंगहस्तैः उपगूहतीव ॥ ६३ ॥

**तात्पर्यम्-**

मम माता देवी कौशल्या इव एषापि सरयूः नदी मे पूज्यचरणेन दशरथेन विरहिता । अस्याः शीतलतरङ्गसम्पर्कात्शीतलवायुः मम गात्रं सम्प्रति संस्पृशति । मन्ये प्रवासप्रत्यागतं पुत्रभूतं मां अतीवोत्कण्ठया वात्सल्यपरिपूर्णा एषा मातृकल्पा सरयूः स्वकरकल्लोलैः समालिङ्गतीव ॥ ६३ ॥

**विरक्तसन्ध्याकपिशं परस्ताद्यतो रजः पार्थिवमुज्जिहीते ।**

**शङ्के हनूमत्कथितप्रवृत्तिः प्रत्युद्गतो मां भरतः ससैन्यः ॥ ६४॥**

**अन्वयः –**

विरक्तसंध्याकपिशं पार्थिवं रजः पुरस्ताद्यतः उज्जिहीते (तस्मात्) हनुमत्कथितप्रवृत्तिः भरतः ससैन्यः सन्मां प्रत्युद्गतः (इति) शंके ॥ ६४ ॥

**तात्पर्यम्–**

अयि! पश्य ! पुरस्तात् एषा अरुणसंध्यावर्णा धूलिः आकाशं समाच्छादयति । तां दृष्ट्वा मे मनः सम्भावयति यत् वायुसूनुना विज्ञापितो भरतः सेनासहितः सन् मे स्वागताय आगच्छति इति ॥ ६४ ॥

**अद्धा श्रियं पालितसंगराय प्रत्यर्पयिष्यत्यनघां स साधुः ।**

**हत्वा निवृत्ताय मृधे खरादीन्संरक्षितां त्वामिव लक्ष्मणो मे ॥ ६५॥**

**अन्वयः –**

(किंच) साधुः सः पालितसंगराय मेऽनघां संरक्षितां श्रियं मृधे खरादीन् हत्वा निवृत्ताय लक्ष्मणः (अनघां संरक्षितां) त्वामिव प्रत्यर्पयिष्यति अद्धा ॥ ६५ ॥

## तात्पर्यम्-

देवि! एष मे निश्चयः यत् साधुस्वभावः भरतः पालितपितृप्रतिज्ञाय मह्यम् अदोषां प्रतिपालितां राज्यलक्ष्मीं तथैव प्रतिदास्यति यथा रणक्षेत्रे खरदूषणप्रभृतीन् यमपुरीं संप्रेष्य प्रत्यागताय मे लक्ष्मणः त्वाम् समर्पयत् ॥ ६५ ॥

## सारांशः

अस्मिन् खण्डे आदौ चतुर्भिः श्लोकैः गंगायमुनयोः संगमः वर्णितः। तथाहि- गंगानद्याः जलं श्वेतवर्णं भवति, यमुनायाः जलं श्यामवर्णं भवति। द्वयोः मेलने सति विलक्षणं सुन्दरं रूपं दृश्यते। तथाहि एकत्र इन्द्रनीलैः अनुविद्धा गंगा मुक्तामयी माला इव दृश्यते।एकत्र नीलहंससहिता सती श्वेतराजहंससमूह इव दृश्यते। एकत्र च कालागुरुदत्तपत्रा सती चन्दनकल्पिता इव दृश्यते। अन्यत्र तावत् नीलमेघेषु कृष्णसर्पधृतः शिवस्य तनुरिव दृश्यते। ये अत्र स्नानं कुर्वन्ति ते अपवर्गं आप्नुवन्ति ।अतः ईदृशं गंगायमुनयोः संगमं पश्य इति सीतायै रामोवाच इति वर्णितम्। ततः परं श्रृङ्गिबेरपुरं प्राप्तम्। तत्रैव रामस्य सखा निषादराजा गुहः आसीत्। तत्रैव च सुमन्त्रः – "आ कैकेयि! तव कामाः फलिताः इति अरुदत् इति रामोवाचेति वर्णितम्। ततः चतुर्भिः श्लोकैः सरयूनद्याः वर्णनं भवति। यत्र यक्षस्त्रीणां स्तनमकरन्दविशिष्टकमलानि भवन्ति तस्मात्मानससरोवरात् सरयूः उत्पद्यते इति प्रथमतः वर्णितम्। अनन्तरं इक्ष्वाकुवंशराजानः सरयूनद्याः तटे अनेकाश्वमेधान् अनुष्ठितवन्तः, तद्योतनाय यूपस्तम्भं च निर्मितवन्तः तान् पश्य तथा अत्रैव ते अवभृथस्नानं कृतवन्तः अतः पुण्यामिमां तेषां मातृसदृशां च पश्य इति वर्णितम्। ततः परम् कोसलराज्ञां इयं सरयूः सामान्यधात्रीमिति मम मनः सं भावयति इति रामोवाच

इति वर्णितम्। मम माता यथा पूज्यं पितरं दशरथं विहाय कष्टे वसति तद्वत् इयमपि तं विहाय कष्टे वसति तथा मातृवत् मां तरङ्गरूपहस्तैः आलिङ्गनं करोति इति मे आभाति इति रामोवाच इति वर्णितम्। ततः अयोध्या समप्राप्ता अतः हनूमद्द्वारा ज्ञातविषयः भरतः ससैन्यः मामभ्युपैति इति भाति इति रामोवाचेति वर्णितम्। ततः भरतस्य शीलत्वं प्रतिपादितं रामेण , तथाहि- दण्डकारण्ये खरादीन् हन्तुं मया गते सति तदानीं मया लक्ष्मणस्य सविधे समर्पिता त्वं यथा पुनरागमने सः प्रत्यर्पयत् तथा अयमपि सुजनः राज्यं निश्चयेन प्रत्यर्पयति इति रामोवाच इति वर्णितम्। एवं रीत्या खण्डस्य सारः संगृहीतः।

### बोधप्रश्नाः

1. तव कामाः फलिताः इति केन उक्तम्?

2. समुद्रस्य पत्न्यौ के?

3. रामस्य जननीव का अस्ति?

4. यूपस्तम्भाः कुत्र विद्यन्ते?

5. कः श्रियं अद्धा प्रत्यर्पयिष्यति?

### शब्दावली

1.कादम्बसंसर्गवती

2.शुभ्रा

3.भस्मान्तरङ्गा

4. राजधानीम्

5. तरङ्गहस्तैः

6. यूपाः

7. हनूमत्कथितप्रवृत्तिः

8. अद्धा

## सन्दर्भग्रन्थः

1. रघुवंशम् – मोतीलाल् बनारसीदास् ,दिल्ली २००४

## सहायकग्रन्थाः

1. रघुवंशम्- सञ्जीविनीव्याख्यासहितम्, चौखम्बा पब्लिशर्स्, वाराणसी,२००२

2. रघुवंशम् – शिवरामभट्टकृतव्याख्यासहितम्, राष्ट्रियसंस्कृतविश्वविद्यालयः, तिरुपतिः, २०२१

## बोधप्रश्नोत्तराणि

1. सुमन्त्रेण

2. गंगायमुने

3. सरयूनदी

4. सरयूनदीतटे

5. भरतः

## अभ्यासप्रश्नाः

1. अस्मिन् खण्डे विद्यमानानां समस्तपदानां विग्रहं लिखत

2. श्लोकोपात्तधातून् उपयुज्य १०० पदप्रयोगान् कुरुत

3. सर्वे श्लोकाः कण्ठस्थीकरणीयाः

# खण्डः ५

पाठरचना

- प्रस्तावना
- उद्देश्यम्
- मूलम्
    1. अन्वयः
    2. तात्पर्यम्
- सारांशः
- बोधप्रश्नाः
- शब्दावली
- सन्दर्भग्रन्थः
- सहायकग्रन्थः
- बोधप्रश्नोत्तराणि
- अभ्यासप्रश्नाः

## प्रस्तावना

महाकविः कालिदासः कविकुलगुरुः कविचक्रवर्ति-इत्यादिनाम्ना सुप्रसिद्धः। तेन त्रीणि महाकाव्यानि रचितानि- रघुवंशम्, कुमारसम्भवम्,मेघदूतम् चेति। तत्र आदिमे द्वे काव्ये महाकाव्येषु अन्तर्भवतः। रघुवंशमहाकाव्यं तावत् सूर्यवंशस्य प्रभाववर्णनात्मकं काव्यं भवति। तत्र एकोनविंशतिसर्गाः सन्ति। आदितः ९ सर्गपर्यन्तं दिलीपमारभ्य दशरथपर्यन्तराज्ञां वर्णनं कृतम्। १० सर्गात् १५ सर्गपर्यन्तं भगवतः श्रीरामस्य वर्णनं भवति। तन्मध्ये विद्यमानस्य अस्य त्रयोदशसर्गस्य विषयः भवति लङ्कापुरीतः पुष्पकविमानेन अयोध्यां प्रति पुनः गमनम्। अस्मिन् खण्डे ६६ श्लोमारभ्य सर्गान्तभागः पाठ्यते। तत्र च आदौ भरतोऽपि चीरवासाः सन् वसिष्ठादीन् पुरस्कृत्य राममभ्युपैति इति

सूचनम्,ततः असिधाराव्रत् भरतेन राज्यं कृतमिति वर्णनम्, ततः परं पुष्पकविमानस्य आकाशादवतरणम्, विमानात् सीतारामयोः अवतरणम्, ततः रामस्य ज्येष्ठानां वन्दनम्, कुशलपश्नादीनां वर्णनम्, भरतेन सह रामस्य आलिङ्गनम्, अर्धक्रोशदूरं यावत् पद्भ्यां रामेण गमनमिति इमे अंशाः प्रतिपादिताः भवन्ति।

## उद्देश्यम्

- रामस्य अयोध्याऽगमनवर्णनं सरलया रीत्या ज्ञायते
- कालिदासस्य काव्यसौष्ठवमवगच्छति
- विभिन्नालङ्काराणां परिचयो भवति
- शब्दानां प्रयोगोपयोगिता ज्ञायते
- धातूनां प्रयोगोपयोगितां ज्ञातुं शक्नुमः

**असौ पुरस्कृत्य गुरुं पदातिः पश्चादवस्थापितवाहिनीकः ।**

**वृद्धैरमात्यैः सह चीरवासा मामर्घ्यपाणिर्भरतोऽभ्युपैति ॥ ६६॥**

**अन्वयः**-

असौ पदातिः चीरवासाः भरतः पश्चादवस्थापितवाहिनीकः गुरुं पुरस्कृत्य वृद्धैरमात्यैः सह अर्घ्यपाणिः (सन्) मामभ्युपैति ॥ ६६ ॥

## तात्पर्यम्-

पश्य देवि ! मम वितर्कः सत्यफलोऽभवत् । गुरुं महामुनिम् वशिष्ठं अग्रे कृत्वा, सैन्यञ्च पृष्ठभागे प्रस्थाप्य एष कषायवस्त्रधारी साधुस्वभावः भरतः पादचारी सन् हस्तौ अर्घ्यं संस्थाप्य वृद्धैः सचिवैः सह मां प्रति आगच्छति ॥ ६६ ॥

**पित्रा विसृष्टां मदपेक्षया यः श्रियं युवाप्यङ्कगतामभोक्ता ।**

**इयन्ति वर्षाणि तया सहोग्रमभ्यस्यतीव व्रतमासिधारम् ॥ ६७॥**

**अन्वयः** –

यः पित्रा विसृष्टाम् अङ्कगतामपि (यां) श्रियं युवापि मदपेक्षयाऽभोक्ता (सन्) इयन्ति वर्षाणि तया सह उग्रम् आसिधारं व्रतम् अभ्यस्यतीव ॥ ६७ ॥

**तात्पर्यम्**–

प्रियतमे । पश्य भ्रातुः भरतस्य अत्युत्कृष्टं त्यागम्। यद्यपि मे जनकः भरताय राज्यलक्ष्मीं प्रायच्छत् तथावि स पूर्णयुवावस्थायां वर्तमानोऽपि "इयं न्याय्येन मे ज्येष्ठ भ्रातुः रामस्य भोग्या" इति मनसि मन्यमानः न तां करतलगतामपि उपभुक्तवान् । यथा कोऽपि अखण्डब्रह्मचारी पर्यङ्कशायिनीं अनिन्द्यसुन्दरीं न उपभुंक्ते शेते च तया सह उन्मुक्तां असिं मध्ये प्रस्थाप्य तथैव अयमपि इक्ष्वाकुवंशपावनः भरतः अङ्कशायिनीं राज्यलक्ष्मीं न रेमे। अहो कीदृशी तस्य भरतस्य मुनिजनैरपि अगम्या त्यागसाधना ॥ ६७ ॥

**एतावदुक्तवति दाशरथौ तदीया-**

**मिच्छां विमानमधिदेवतया विदित्वा ।**

**ज्योतिष्पथादवततार सविस्मयाभि-**

**रुद्वीक्षितं प्रकृतिभिर्भरतानुगाभिः ॥ ६८॥**

**अन्वयः –**

दाशरथौ एतावदुक्तवति (सति) विमानं तदीयाम् इच्छाम् अधिदेवतया विदित्वा सविस्मयाभिः भरतानुगाभिः प्रकृतिभिः उद्वीक्षितम् ज्योतिष्पथादवततार ॥ ६८ ॥

**तात्पर्यम्–**

एवं भाषमाणे श्रीरामचन्द्रे सति पुष्पकविमानम् स्वस्य अधिष्ठात्र्या देवतया मिषेण श्रीरामचन्द्रस्य मनःसंकल्पं परिज्ञाय नक्षत्रमार्गात् पृथिव्याः उपरि अवतीर्णम् अवलोकितञ्च विस्मयविमुग्धैः भरतानुगाभिः प्रजाभिः ॥ ६८ ॥

**तस्मात्पुरःसरविभीषणदर्शनेन**

**सेवाविचक्षणहरीश्वरदत्तहस्तः ।**

**यानादवातरददूरमहीतलेन**

**मार्गेण भङ्गिरचितस्फटिकेन रामः ॥ ६९॥**

**अन्वयः –**

रामः सेवाविचक्षणहररीश्वरदत्तहस्तः (सन्) पुरःसरविभीषणदर्शितेन अदूरमहीतलेन भङ्गिरचितस्फटिकेन मार्गेण तस्माद्यानादवातरत् ॥ ६९ ॥

**तात्पर्यम्-**

रामः स्फटिकपाषाणालङ्कृतसोपानेन विमानात् अवततार तदानीं सेवायां कुशलः सुग्रीवः हस्तं दत्तवान् ।तत्स्वीकृत्य विमानात् अवतरतु इति सुग्रीवः अवदत् विभीषणोऽपि पुरस्स्थितः सन् मार्गं दर्शयांचकार ॥ ६९ ॥

**इक्ष्वाकुवंशगुरवे प्रयतः प्रणम्य**

**स भ्रातरं भरतमर्घ्यपरिग्रहान्ते ।**

**पर्यश्रुरस्वजत मूर्धनि चोपजघ्रौ**

**तद्भक्त्यपोढपितृराज्यमहाभिषेके ॥ ७० ॥**

**अन्वयः** –

प्रयतः स इक्ष्वाकुवंशगुरवे प्रणम्य अर्घ्यपरिग्रहान्ते पयश्रुः (सन्) भ्रातरं भरतम् अस्वजत तद्भक्त्यपोढपितृराज्यमहाभिषेके मूर्द्धनि उपजघ्रौ च ॥ ७० ॥

**तात्पर्यम्** –

परिशुद्धः स रामः इक्ष्वाकुवंशगुरवे वसिष्ठाय नमस्कृत्या भरतानीतार्घ्यादीन् स्वीकृत्य परिगतानन्दवाष्पः सन् भ्रातरं भरतमालिङ्गनं कृतवान्। ततः रामः प्रीत्या परिहृतपितृराज्यमहाभिषेके सति तस्य मूर्धन्युपघ्रौ च ॥ ७० ॥

**श्मश्रुप्रवृद्धिजनिताननविक्रियांश्च**

**प्लक्षान्प्ररोहजटिलानिव मन्त्रिवृद्धान् ।**

**अन्वग्रहीत्प्रणमतः शुभदृष्टिपातै-**

**र्वातानुयोगमधुराक्षरया च वाचा ॥ ७१ ॥**

**अन्वयः**-

श्मश्रुप्रवृद्धिजनिताननविक्रियान् प्ररोहजटिलान् प्लक्षानिव (स्थितान्) प्रणमतः मन्त्रिवृद्धांश्च शुभदृष्टिपातैः वार्तानुयोगमधुराक्षरया वाचा चान्वग्रहीत् ॥ ७१ ॥

**तात्पर्यम्-**

रामं विहाय अयोध्यायां रामाभावजनितशोकात् श्मश्रूणामभिवृद्ध्या जनितमुखविक्रियान् जटिलान् शाखावलम्बिभिः न्यग्रोधानिव स्थितान् साकेतजनान् प्रणामं कृतवन्तः। रामोऽपि प्रणमतो मन्त्रिवृद्धाँश्च कृपासहितदृष्टिपातैः कुशलप्रश्नेन मधुरवाचा च अनुगृहीतवानिति ॥ ७१ ॥

**दुर्जातबन्धुरयमृक्षहरीश्वरो मे**

**पौलस्त्य एष समरेषु पुरःप्रहर्ता ।**

**इत्यादृतेन कथितौ रघुनन्दनेन**

**व्युत्क्रम्य लक्ष्मणमुभौ भरतो ववन्दे ॥ ७२॥**

**अन्वयः-**

अयं मे दुर्जातबन्धुः ऋक्षहरीश्वरः एषः समरेषु पुरः प्रहर्ता पौलस्त्य इति रघुनंदनेन कथितावुभौ लक्ष्मणं व्युत्क्रम्य भरतः ववन्दे ॥ ७२ ॥

**तात्पर्यम्-**

रामः "अयं मे आपद्बन्धुः ऋक्षाणां हरीणां च ईश्वरः सुग्रीवः । एष समरेषु पुरःप्रहर्ता पुलस्त्यवंशजः विभीषणः" इत्यादारेण कथितवान्। रामेण कथितावुभौ विभीषणसुग्रीवौ लक्ष्मणमप्युल्लङ्घ्य आलिंङ्गनादिभिः भरतो नमस्कृतवान् ॥ ७२ ॥

**सौमित्रिणा तदनु संससृजे स चैन-**

**मुत्थाप्य नम्रशिरसं भृशमालिलिङ्ग ।**

**रूढेन्द्रजित्प्रहरणव्रणकर्कशेन**

**क्लिश्यन्निवास्य भुजमध्यमुरस्स्थलेन ॥ ७३॥**

**अन्वयः** –

तदनु सः सौमित्रिणा संससृजे नम्रशिरसमेनमुत्थाप्य भृशम् आलिलिंग च (किं कुर्वन्) रूढेन्द्रजित्प्रहरणव्रणकर्कशेनास्योरः स्थलेन भुजमध्यं क्लिश्यन्निव ॥ ७३ ॥

**तात्पर्यम्**–

सुग्रीवादिवन्दनानन्तरं स भरतः सौमित्रिणा संगते सति तं नमस्कृतवान् लक्ष्मणः ततः भरतः लक्ष्मणम् उत्थाप्य मेघनादप्रहरणव्रणैः कर्कशेनास्य लक्ष्मणस्य उरस्थलेन स्वकीयं भुजमध्यं पीडयन्निव गाढालिङ्गनं च अकरोत् ॥ ७३ ॥

**रामाज्ञया हरिचमूपतयस्तदानीं**

**कृत्वा मनुष्यवपुरारुरुहुर्गजेन्द्रान् ।**

**तेषु क्षरत्सु बहुधा मदवारिधाराः**

**शैलाधिरोहणसुखान्युपलेभिरे ते ॥ ७४॥**

**अन्वयः**-

तदानीं हरिचमूपतयः रामाज्ञया मनुष्यवपुः कृत्वा गजेन्द्रानारुरुहुः, बहुधा मदवारिधाराः क्षरत्सु तेषु ते शैलाधिरोहणसुखानि उपलेभिरे ॥ ७४ ॥

**तात्पर्यम्**–

तदनन्तरं ते कपिसैन्यसञ्चालकाः श्रीरघुनन्दनस्य आदेशेन मनुष्यशरीरेण आत्मानं परिणम्य हस्तिषु समारूढवन्तः । ते विशालशरीराः हस्तिनः पतितजलदानप्रवाहाः सन्तः पर्वताः इव आभासन्त । अत एव ते कपिसैन्यनायकाः निर्झरवत्सु अचलेषु आरोहणानन्दं अनुबभूवुः ॥ ७४ ॥

**सानुप्लवः प्रभुरपि क्षणदाचराणां**

**भेजे रथान्दशरथप्रभवानुशिष्टः ।**

**मायाविकल्परचितैरपि ये तदीयै-**

**र्न स्यन्दनैस्तुलितकृत्रिमभक्तिशोभाः ॥ ७५॥**

**अन्वयः** –

सानुप्लवः क्षणदाचराणां प्रभुरपि दशरथप्रभवानुशिष्टः (सन्) रथान्भेजे ये मायाविकल्परचितैरपि तदीयैः स्यन्दनैः तुलितकृत्रिमभक्तिशोभाः न (बभूवुः) ॥ ७५ ॥

**तात्पर्यम्** –

तदा निशाचरेश्वरः लङ्काधिपः विभीषणः श्रीदशरथतनयस्य रघुनन्दनस्य आज्ञां शिरसि धृत्वा स्वसेवकैः सह स्यन्दनान् आरूढवान् । विभीषणस्य मासिककल्पनानुसारमायारचिताः अपि रथाः तेषां अयोध्यायाः कुशलशिल्पकारैः रचितानां चारुचित्रितानां स्यन्दनानां श्रियः न प्राप्तवन्तः ॥ ७५ ॥

**भूयस्ततो रघुपतिर्विलसत्पताक-**

**मध्यास्त कामगति सावरजो विमानम् ।**

**दोषातनं बुधबृहस्पतियोगदृश्य-**

**स्तारापतिस्तरलविद्युदिवाभ्रवृन्दम् ॥ ७६ ॥**

**अन्वयः**-

ततः रघुपतिः सावरजः (सन्) विलसत्पताकं कामगति विमानं भूयः बुधबृहस्पतियोगदृश्यः तारापतिः दोषातनं तरलविद्युदभ्रवृन्दमिवाध्यास्त ॥ ७६ ॥

**तात्पर्यम्**-

ततः सर्वेषां आरोहणानन्तरं श्रीजानकीशोऽपि भरतलक्ष्मणसहितः सन् इच्छाचारिणम् पुष्पकविमानम् आरुरोह । तत्काले चञ्चलवैजयन्तीयुक्ते चित्रितानेकवर्णे पुष्पकविमाने भरतलक्ष्मणयोः मध्ये तिष्ठन् श्रीरामचन्द्रः अनेकवर्णरञ्चिते बुधबृहस्पत्योः मध्ये स्थितः मनोरमदर्शनः चन्द्रः इव रराज ॥ ७६ ॥

**तत्रेश्वरेण जगतां प्रलयादिवोर्वीं**

**वर्षात्ययेन रुचमभ्रघनादिवेन्दोः।**

**रामेण मैथिलसुतां दशकण्ठकृच्छ्रा-**

**त्प्रत्युद्धृतां धृतिमतीं भरतो ववन्दे ॥ ७७॥**

**अन्वयः**-

तत्र जगतामश्वीरेण प्रल्यादुर्वीमिव वर्षाध्ययेनाभ्रघनादिन्दोः रुचमिव रामेण दशकण्ठकृच्छ्रात् प्रत्युद्धृतां धृतिमतीं मैथिलसुतां भरतः ववन्दे ॥ ७७ ॥

**तात्पर्यम्**-

यथा आदिवराहः प्रलयमग्नाम् वसुन्धराम् उद्द्धार, यथा शरत्कालः वर्षायाः मेघजालात् चन्द्रकान्तिम् उन्मोचयति, तथैव श्रीरामचन्द्रोऽपि रावणपाशात् जनकनन्दिनीं विमोचयमास । तां विमानाधिरूढाम् भगवतीं वसुन्धरासुताम् सीताम् भरतः प्रणनाम ॥ ७७॥

**लङ्केश्वरप्रणतिभङ्गदृढव्रतं त-**

**द्वन्द्यं युगं चरणयोर्जनकात्मजायाः ।**

**ज्येष्ठानुवृत्तिजटिलं च शिरोऽस्य साधो-**

**रन्योन्यपावनमभूदुभयं समेत्य ॥ ७८॥**

**अन्वयः** -

लङ्केश्वरप्रणतिभङ्गदृढव्रतं वन्द्यं तत् जनकात्मजायाः चरणयोर्युगं ज्येष्ठानुवृत्तिजटिलमस्य साधोः शिरश्च (इति) उभयं समेत्यान्योन्यपावनमभूत् ॥ ७८ ॥

**तात्पर्यम्** –

रावणस्य नतीनां निरासेन अखण्डितपातिव्रत्यमत एव वन्द्यं तज्जनकसुतायाः चरणयोर्युगं ज्येष्ठानां अनुवृत्त्या जटासहितं सज्जनस्यास्य भरतस्य शिरश्चेत्युभयं मिलित्वा परस्परं पावनमभूत् ॥ ७८ ॥

**क्रोशार्धं प्रकृतिपुरःसरेण गत्वा**

**काकुत्स्थः स्तिमितजवेन पुष्पकेण ।**

**शत्रुघ्नप्रतिविहितोपकार्यमार्यः**

**साकेतोपवनमुदारमध्युवास ॥ ७९॥**

**अन्वयः** –

आर्यः काकुत्स्थः प्रकृतिपुरःसरेण स्तिमितजवेन पुष्पकेण क्रोशार्द्धं गत्वा शत्रुघ्नप्रतिविहितोपकार्यमुदारं साकेतोपवनम् अध्युवास ॥ ७९॥

**तात्पर्यम् –**

तत्पश्चात् मन्दीकृतवेगं पुष्पकविमानं अधिरुह्य श्रीरामचन्द्रः अर्धकोशम् अतिक्रम्य अयोध्यायाः तेषु रमणीयेषु उपवनेषु स्वसुहृदसहायकैः सह अवसत् यत्र पूर्वमेव तस्य सुखनिवासाय शत्रुघ्नः वस्त्रभवनानि निर्मितवान् ॥ ७९ ॥

## इति श्रीरघुवंशे महाकाव्ये कविश्रीकालिदासकृतौ

## दण्डकाप्रत्यागमनो नाम त्रयोदशः सर्गः ॥

## सारांशः

अत्र प्रथमतः भरतस्य वर्णनं भवति। तथाहि- चीरवासाः सन् भरतः वसिष्ठं कुलगुरुं तथा मन्त्रीन् च पुरस्कृत्य पाणौ अर्घ्याय जलं स्वीकृत्य रामं पूजयितुं पूजासाधनैः सह समागतः इति रामोवाच इति वर्णितम्। अनन्तरं भरताय राज्यं पित्रा यदा दत्तं तदा सः युवा आसीत्। अतः तेन यत् राज्यपरिपालनं कृतं तत्र दोषाः सन्तीति वक्तुं न शक्यते। परन्तु मयि भक्त्या भरतः राज्ये विरक्तः सन् तं ररक्ष। राजाऽपि सः राज्यसुखमननुभूय स्थितः । एषः स्वभावः दुर्लभः असिधाराव्रतवत् कठिनश्च इति रामेण श्लाघितः भरतः इति वर्णितम्। एतावत्कालं रामेण सर्वं सीतायै वर्णिते सति अयोध्यानगरी संप्राप्ता। तस्मात् रामः विमानात् अवतरणं कर्तव्यमिति धीः उत्पन्ना। स्वाधिदेवतया तज्ज्ञात्वा पुष्पकविमानं स्वयमेव अवततार। तदानीं भरतः सप्रजः आश्चर्येण विमानावतरणं दर्शयामास। ततः रामः विमानात् स्फटिकखचितसोपानैः भूमौ अवततार। तदानीं सेवाधुरीणः सुग्रीवः स्वहस्तं अवतरणाय रामाय अददात्। विभीषणश्च मार्गं पर्दर्शितवान् इति वर्णनं कृतम्। अनन्तरं रामः कुलगुरुं वसिष्ठं नत्वा भरतनिवेदिताऽर्घ्यादीन् स्वीकृत्य तं आलिङ्गनं कृत्वा शिरसि आघ्रातवान् इति वर्णयाञ्चकार। ततः परं रामस्य वियोगात् खिन्नाः ये अयोध्यावासिनः तथा मन्त्रिणः वटवृक्षवत् संपादितश्मश्रवः रामं नमितवन्तः। रामोऽपि तेषां दिव्यकटाक्षेण अनुगृहीतवान्। ततः सर्वेषां कृते सुग्रीवस्य तथा विभीषणस्य च परिचयं कारितवान्। विभीषणोऽपि भरतं ववन्द इति वर्णन/म कृत्वा अग्रिमश्लोके सौमित्रिः लक्ष्मणः भरतं नमस्कृतवान् ततः परं तेन सह आलिङ्गनं कृतवान् इति वर्णनमासीत्। ततः रामः वानराणां कृते मानुषवपुस्स्वीकरणाय आदिष्टवान्। तथाकृते सति तेऽपि सन्तुष्टाः अभूवन् इति वर्णनं कृतम्। ततः रामाज्ञया सराक्षसः विभीषणः रथमारुरोह। यद्यपि विभीषणस्य रथः मायाविशिष्टः तथापि रामस्य रथेन सह शोभा न प्राप्ता। ततः रामः सभ्रातः रात्रौ बुधबृहस्पतिभ्यां परिभृतः चन्द्रः इव दृश्यते इति वर्णितम्। ततः भरतः राज्यसमर्पणाय सीतारामयोः चरणेषु शिरः स्थापितवान् ततः सपरिवारः रामः अर्धक्रोशदूरं यावत् पद्भ्यां गत्वा उपवने अध्यवास इति सर्गस्य समापनं कृतं महर्षिणा।

## बोधप्रश्नाः

1. चीरवासाः कः?

2. भरतः कौ ववन्दे?

3. भरतः केन संससृजे ?

4. क्षणदाचराणाम् प्रभुः कः?

5. रामेण मैथिलसुतां कस्मात् प्रत्यद्धरणं कृतम्?

## शब्दावली

1. पदातिः

2. ज्योतिष्पथात्

3. संससृजे

4.शैलाधिरोहणसुखानि

5. दोषातनम्

6. क्षणदाचराणाम्

7. मैथिलसुतां

8. पौलस्त्यः

## सन्दर्भग्रन्थः

1. रघुवंशम् – मोतीलाल् बनारसीदास् ,दिल्ली २००४

## सहायकग्रन्थाः

1. रघुवंशम्- सञ्जीविनीव्याख्यासहितम्, चौखम्बा पब्लिशर्स्, वाराणसी,२००२

2. रघुवंशम् – शिवरामभट्टकृतव्याख्यासहितम्, राष्ट्रियसंस्कृतविश्वविद्यालयः, तिरुपतिः, २०२१

## बोधप्रश्नोत्तराणि

1. भरतः

2. रामलक्ष्मणौ

3. लक्ष्मणेन

4. विभीषणः

5. दशकण्ठकृच्छ्रात्

**अभ्यासप्रश्नाः**

1. अस्मिन् खण्डे विद्यमानानां समस्तपदानां विग्रहं लिखत

2. श्लोकोपात्तधातून् उपयुज्य १०० पदप्रयोगान् कुरुत

3. सर्वे श्लोकाः कण्ठस्थीकरणीयाः

**********